अर्धेन्दुघाटीकरपल्लवाद्यः सौभाग्यलीलालिपिहेमपट्टः ।
जानामि यत्कर्णकुटी कुटीरः श्रीजानकीराघवकेलिसारः ॥ २० ॥
नारायणक्षोणिपतेरजेयं मनो विजेतुं नु कटाक्षबाणैः ।
रतेरनङ्गस्य च कार्मुके किं यासां भ्रुवावुल्लसतः सलीले ॥ २१ ॥
जानामि याः काञ्चनकल्पवल्लीः समाश्रितौ लोचनखञ्जनौ तु ।
याभ्यां मुखाम्भोरुहमण्डलोऽपि मीनं गतश्चन्द्र इव व्यराजत् ॥२२॥
यासां सरोजीवनसौधकुण्डे विलोचने कज्जलपङ्करेखा ।
सरोजसौरभ्यनितान्तलुब्धद्विरेफमालेव समुल्ललास ॥ २३ ॥
यन्नासिकाकान्तितिरस्कृतानि तिलप्रसूनानि वनं श्रितानि ।
मुखेन यासां विजितः सुधांशुः कृतास्पदः श्यामिकयाऽधुनापि॥२४॥
आदाय यासां विजितात्सुधांशोः सुधाभिराप्ूरि मुखारविन्दम् ।
एकत्र यन्नीचकलः कृशीयानालोक्यते प्रातिपदोऽयमिन्दुः ॥ २५ ॥
यदीयदन्तावलिनिर्जितानि मग्नानि सिन्धौ नवमौक्तिकानि ।
क पल्लवे पादपरागलेशो बिम्बेऽधरच्छायलवोऽपि यासाम् ॥ २६ ॥
यदीयबिम्बाधरकान्तिपूरैर्मुक्तामणिः पाटलदीप्तिरासीत् ।
सोल्लासनासाशुकपोतचञ्चुसमुल्लसद्दाडिमबीजकल्पः ॥ २७ ॥
यत्कण्ठशोभाविजितः स कम्बुः श्रीवासुदेवं भजतेऽधुनापि ।
वीणापि यासां स्वरखर्वगर्वा वाग्देवताराधनमातनोति ॥ २८ ॥
भुजैर्मृणालैरिव कण्ठनालैः(?)करैः सरोजैरिव सानुरागैः ।
नखैः प्रसूनैरिव या महीभृद्भानोः सरोजिन्य इव व्यराजन् ॥२९॥
चित्तेऽवकाशं रमणाय दातुं यासां स्तनौ किं बहिरभ्युपेतौ ।
तारुण्यमायातमवेक्ष्य चाग्रे चिरं समुत्थानसमुन्नतौ किम् ॥३०॥
यासां कुचौ चूचकपाचिचूडप्रासादभूतौ रतिकामयोः किम् ।
नाभीतलावालजरोमवल्लीप्रसूनगुच्छाविव भृङ्गलीढौ ॥ ३१ ॥
वितानवेदीहरिणाधिराजदेवाङ्गनानामपि मध्यभागः ।
इति त्रयीयं विजितेति यासां मध्यो वलीभिस्तिसृभिः शशंस ॥ ३२ ॥
याः कामदेवस्य लसन्नितम्बबिम्बैकचक्रो रथ एव मन्ये ।
आरुह्य यत्रैप विचित्रसूर्यो दर्पेण नक्तंदिवमभ्युदीते ॥ ३३ ॥

यदूरुशोभाविजिता नितान्तं बिभर्त्ति रम्भाऽभिभयेन शैत्यम् ।
सनूपुरैर्यैश्चरणैर्जितानि सहंसपद्मानि वनं श्रयन्ते ॥ ३४ ॥
याभिर्महीमण्डलभासिनीभिः प्रसाधिताभिर्निजकामिनीभिः ।
प्रकाममाभासत भूमिपालस्तारावलीभिः सकलः शशीव ॥ ३५ ॥
कुसुमशरविलासजैत्रमूर्तिं नरपतिमत्र कुरङ्गशावनेत्राः ।
घनमदमदनोदयादुदञ्चत्पुलककपोलमलोकयन्नपाङ्गैः ॥ ३६ ॥

लीलावलम्बितपरस्परपाणिपद्माः
कामालसाः कमलकोमलकान्तयस्ताः ।
आलीविनोदवचनोद्भवमन्दहासाः
कामप्यनङ्गमधुरामलभन्त शोभाम् ॥ ३७ ॥

ततो नरेन्द्रोऽपि विनोदसुन्दरो दरोदितापाङ्गतरङ्गरिङ्गणैः ।
अनङ्गसंरङ्गदपाङ्गमङ्गनाजनं घनानन्दमयं व्यलोकयत् ॥ ३८ ॥
ताः प्रिये मदनसुन्दरे रमामन्दिरे तरलमानसैः स्थिताः ।
भूतले तु कलये कलेवरैः केवलं कमललोचनाः स्थिताः ॥ ३९ ॥
उत्तुङ्गे कुचतटयोरतीव निम्ने मध्ये तु स्फुटतरमुन्नते नितम्बे ।
भूभर्त्तुः स्खलति मनः स्म वल्लभाङ्गे धीराः किं खलु विषमेषु न स्खलन्ति ॥ ४० ॥

भूरिभूषणविभूषिताः स्फुरत्पाणयो विलसदंशुकाञ्चलाः ।
तत्र राजवनिता विरेजिरे जङ्गमाः कुसुमिता लता इव ॥ ४१ ॥
अथमत्तचकोरचारुनेत्रा परिणेत्रा सहिताः स्फुरद्विहाराः ।
कुसुमावचयाय ताश्चिराय प्रतिवल्लि प्रतिपादपं विचेरुः ॥ ४२ ॥
मदमन्दमतङ्गजमन्दचरः कुसुमाकुलकेशकलापभरः ।
कलकङ्कणनूपुरनादकरः सविलासमियाय वधूनिकरः ॥ ४३ ॥
मन्दमन्दपरिधूतकदम्बः कम्पचापलकरो वनवायुः ।
कामसायकविमोचनजन्मा सुन्दरीभिरविवादममानि ॥ ४४ ॥
पश्यति प्रियतमे रमणीनां प्रस्फुरत्तरलहारमणीनाम् ।
उत्तरोत्तरविचित्रचरित्रं तत्र चेष्टितमतीव दिदीपे ॥ ४५ ॥

गतिं विना स्थातुमशक्यमेव गतौ पुनः स्यादभिमानभङ्गः ।
सखीसमूहादिति काऽपि नारी नारायणं गन्तुमगन्तुमैच्छत् ॥४६॥
काऽपि केलिकनकोत्पलकोशं निर्दयं करतलेन ममर्द ।
काऽपि चम्पकदलं चपलाक्षी लीलया नखमुखेन लिलेख ॥४७॥
विलासमन्दं वदनारविन्दं करारविन्दे विनिधाय काचित् ।
नारायणं रम्यमुखारविन्दं चित्तारविन्दे वनिता निदध्यौ ॥ ४८ ॥
सुव्यक्तभास्वत्कुचकुम्भभारा वल्लीव पुष्पस्तवकाभिरामा ।
वलद्वलीभङ्गमलीकमन्या बाला तमालं द्रुतमाललम्बे ॥ ४९ ॥
काऽपि कुन्तलकलापबन्धनच्छद्मनोन्नमितपाणिपल्लवा ।
किञ्चिदेव कुचकुम्भमण्डलप्रान्तभागकलिकामभासयत् ॥ ५० ॥
किञ्चित्समालोकितसस्मिताली घर्माम्बुसङ्कीर्णकपोलपाली ।
काऽपि त्रपानम्रमुखी नवोढा वोढारमालोक्य चिरं चकम्पे ॥५१॥

अवोचत सखीमिदं चपललोचना काचन
प्रमोदभरनिर्भरे किमपि पार्थिवे शृण्वति ।
पुरा परमगौरवं मयि बभूव भूमीपते-
र्न वेद्मि सखि विद्यते किमु न विद्यते साम्प्रतम् ॥ ५२ ॥

मुग्धेऽपराद्धममुना किमु ते यदेनं
भ्रूचापविद्धतकटाक्षशरैर्निहंसि ।
सख्येति वाक्यमुदिता परिहासपूर्वं
काचिन्निशाकरमुखी विमुखीबभूव ॥ ५३ ॥

नायक त्वमसि नैकनायिकः सा त्वदेकशरणा कृशोदरी ।
तेन तद्विगणनां विधेहि मा स्वाश्रितेऽकरुणा हि सूरयः ॥ ५४ ॥
अन्तरालभयशङ्कया यया चन्दनं कुचतटे न चर्चितम् ।
कान्त किं नु मकरीव वारिणः सा तवातिविरहं सहिष्यते ॥५५॥
किञ्च पञ्चविशिखोऽपि पञ्चभिः सायकैरिह तनूकरोति ताम् ।
अभ्युपेत्य पतिमित्यमुच्यतां काचिदित्यनुचरी ननाद्रिराट् ॥५६॥
बालामेवमदर्शयत्प्रियसखी तस्मै नृप प्रेक्षतां
यदिह शेषकलाविलासिनि कलानाथे समुन्मीलति ।

ध्वान्तं भूरि विजृम्भते विकसति स्वैरं सरोजावली
पीनं माद्यति चक्रवाकयुगलं संबाधसंयोगतः ॥ ५७ ॥

नारायणक्षितिभृता स्वयमेव दत्तां
मालां विलोक्य ललनाकुचकुम्भयुग्मे ।
भारो बभूव कनकाभरणं परस्याः
स्त्रीणां प्रियप्रणय एव हि भूरिभूषा ॥ ५८ ॥

लसन्मालतीमालिकां कण्ठदेशे नवालक्तरागं च विम्बाधरोष्ठे ।
कुचे चन्दनं वीक्ष्य काचित्सपत्न्याः प्रिये सापराधेऽपि योषा तुतोष॥५९

आरामशोभामवलोकयन्त्या वसन्तलक्ष्म्याश्चरणाम्बुजोत्थान् ।
लाक्षानुरागानिव नीरजाक्ष्यो बालप्रवालान्ददृशुर्लतासु ॥ ६० ॥

वधूजने चिन्वति पुष्पमालां भयाकुलाः षट्पदपायिकौघाः ।
आरामपाला इव कामराजं कोलाहलैर्जागरयाम्बभूवुः ॥ ६१ ॥

पुष्पाद्यावचयं मधुर्वनपतिश्चार्प्येयपुष्पच्छला-
त्कन्दर्पक्षितिपाय किं कलयितुं तेने दिवादीपिकाः ।
कामोप्येनमुवाच कोकिलरवैः पश्याधुनैव प्रिया-
भ्रूचापास्तकटाक्षमार्गणगणैर्जेष्यामि नारायणम् ॥ ६२ ॥

निर्विराममनुरागसम्पदामास्पदानि मृगशावलोचनाः ।
गन्धलेशरहितानि कर्णिकाः कर्णिकारकुसुमानि चक्रिरे ॥ ६३ ॥

नरपतिवनितास्ततोविरेमुश्चिरकुसुमावचयेन भिन्नगात्राः ।
सहजमपि मदालसा युवत्यः किमुत वनान्तविहारखेदभाजः ॥६४॥

आरादारामवापीविहरणकुतुकी केतकीगन्धबन्धु-
र्मन्दव्याधूतनीलोत्पलदलमुकुलो मालतीधूलिमाली ।
तासामारोहपीनस्तनवहनघनस्वेदविच्छेदहेतुः
केलीमाकन्दवीथीविपणिमभि ववौ दाक्षिणात्यः समीरः ॥६५॥

मदकलसहकारालम्बिरोलम्बगुञ्जा-
रवपिककुलचञ्चत्पञ्चमैः संप्रकीर्त्य ।
कुसुमभरविकासैरस्य भूपस्य कीर्ती-
र्दिशि दिशि च विकीर्य द्रागवसन्तः प्रतस्थे ॥ ६६ ॥

श्रीमद्बागुलभूमिपालतिलकश्रीशाहनारायण-
स्फूर्जत्कीर्त्तिचरित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।
भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्येऽस्मिन्मधुपुष्परागरसिको मन्वंकसर्गोऽगमत् ॥ ६७ ॥

॥ इति श्रीमदखिलभूपालमौलिमुकुटललाममालामरीचिवीचिचुम्बितचरणसरो-
जमयूरगिरिकेसरिश्रीमहाराजनारायणशाहोद्योजितदाक्षिणात्यरुद्र-
कवीन्द्रविरचिते राष्ट्रौढवंशे महाकाव्ये वसन्तमण्डितवन-
विहारो नाम चतुर्दशः सर्गः ॥

पञ्चदशः सर्गः ।

नारायणक्षितिपतेः प्रथितप्रभाव-
प्रौढप्रतापकिरणैरिव तप्तमूर्तिः ।
व्यक्तोदयः प्रतिदिनोपचितार्कतेजः-
पुञ्जैर्निदाघसमयोऽथ समाजगाम ॥ १ ॥

उद्यत्कठोरतरभास्करधामदग्ध-
पादाम्बुजेव शनकैरगमद्दिनश्रीः ।
चण्डांशुशोषितसुधस्य लघोः सुधांशोः
सद्योगतेषु (?चरणेषु) निशा कृशाऽभूत् ॥ २ ॥

कर्णे वारिजमानने मृगमदं कर्पूरपूरं कुचे
मौलौ चम्पकचारुदामवलयं बालं मृणालं भुजे ।
कण्ठे बालसरोजहारलतिकामालम्बमानास्तदा
दृष्टाः कस्य सचेतसः स न मनः प्रीणन्ति वामभ्रुवः ॥ ३

कलयामि दिवाकरः करालद्युतिरारुह्य नृपं धनुष रजः ।
स परं कथमन्यथा पिपासे परितापं पुरसुन्दरीजनानाम् ॥ ४ ॥

किं विना शिशिरवारिणेति किं वायुराप तृषितानां शनैः शनैः
भास्करोऽपि सुतरां तृषाऽऽकुलो भूरि वारि सरितां समादधे ॥

हरितो हुताशनमुचः परितः सरितोऽपि चीनपयसो विहिताः ।
जनता खरांशुमहसाऽऽकुलिता मदनो वधूकुचतटीमगमत् ॥ ६ ॥
अथ भैरवभूमिपालसूनुः सह शुद्धान्तकुरङ्गलोचनाभिः ।
कमनीयविलासवासवापीजलपालीषु विलासकेलिमायात् ॥ ७ ॥
वेल्लद्भुजावल्लिविलोलिताम्भोनिमज्जदुन्मज्जदुरोरुहाणाम् ।
शरीरवल्ल्या वरवर्णिनीनां सा दीर्घिका हेममयी बभूव ॥ ८ ॥
पूर्णीकृतानां जलयन्त्रिकाणां धाराजलैश्चामरचारुशोभैः ।
निमीलिताक्ष्यः सरसीरुहाक्ष्यः परस्परं सस्मितमभ्यषिञ्चन् ॥ ९ ॥
नारायणक्षोणिभुजा सलीलं सिक्ते प्रियाया वदनारविन्दे ।
मुखेन्दुरासीत्प्रतिनीरजाक्ष्याः सिक्तो गलल्लोचनवारिपूरैः ॥ १० ॥
विलोक्य तासां मुखचन्द्रमाराद्वापीसरोजानि निमीलितानि ।
कोकाः सशोका दिवसेऽप्यभूवन्बभुः प्रसन्नानि च कैरवाणि ॥ ११ ॥

कस्तूरीमलयजकुङ्कुमावलेपे
वीचीभिः सपदि हृते विलासवत्याः ।
उद्वीक्ष्य स्तनकलशे स्फुटं नखाङ्कं
सन्तेपे पयसि हिमेऽप्यहो सपत्न्या ॥ १२ ॥

सहैव नारायणपार्थिवेन निदाघसन्तापभरं निरस्य ।
उत्तीर्य तोयादबलासमूहो जग्राह वस्त्राभरणानि सद्यः ॥ १३ ॥

अकञ्चुकमुरस्थलं स्फुटनखाङ्कशोभौ कुचौ
विलोचनमनञ्जनं (गल)दलक्तरागोऽधरः ।
घनं जघनमण्डनं विगतशाटकं योषितां
रतान्तसमयश्रियं सलिलकेलयस्तेनिरे ॥ १४ ॥

निदाघमपि निर्जित्य जलकेलिमिषादिति ।
नारायणधरापालः सुन्दरं मन्दिरं श्रितः ॥ १५ ॥

श्रीशाहनारायणपार्थिवस्य प्रौढप्रतापं परितः प्रसार्य ।
प्रचण्डमार्त्तण्डमरीचिदम्भान्निदाघकालोऽपि विनिर्जगाम ॥ १६ ॥

चञ्चत्पीनपयोधरा चलतडित्प्रेङ्खत्कटाक्षच्छटा
चित्रेन्द्रायुधमण्डना घनतमःकस्तूरिकालेपना ।

श्रीनारायणशाहपार्थिवगुरोरालोकनायेव किं
प्रावृट्पङ्कजलोचनाऽथ शनकैराविर्बभूवाकुला ॥ १७ ॥
घनकुम्भिनि गर्जति घोरतरं हरिरम्बुधिमिन्दिरया सहितः ।
वनिताकुचदुर्गतटं मदनस्तपनोऽपि भिया बत सिंहमगात् ॥१८॥
जलप्लुतां वीक्ष्य वनीं विलासैः पयोमुचामष्टमसिन्धुशङ्की ।
बहिः फणीन्द्रो वहति स्म मन्ये फणं शिलीन्ध्रोदयकैतवेन ॥१९॥
पर्जन्यो मुदमुदपादयज्जनानां
दावाग्निज्वरमहरन्महावनानाम् ।
कल्याणं कलयति च स्म चातकानां
बाहुल्यं स्म वदति पान्थपातकानाम् ॥ २० ॥
रटद्घनघरट्टेन घृष्टस्य प्रावृषा हठात् ।
खण्डाइव मृगाङ्कस्य बलाका दिवि रेजिरे ॥ २१ ॥
सार्द्धं सुधांशुद्युतिमुग्धदुग्धैः संभुज्य तारावलिकूरपूरम् ।
उच्छिष्टदोषापनयाय तोयैस्ततान गण्डूषमिवाम्बुवाहः ॥ २२ ॥
अत्युष्णमास्वाद्य सहस्रभानुं निपीडितो नीरधरो नितान्तम् ।
मुहुर्मुहुर्हन्त मरीचिदग्धां तडिद्रसज्ञां तरलीचकार ॥ २३ ॥
केकिनि क्वणति कोमलकण्ठे वाति च स्फुटकदम्बसमीरे ।
मानिनीजनमनस्थितमानस्तत्क्षणेन शतशर्करितोऽभूत् ॥ २४ ॥
लाटीमण्डलपीवरस्तनतटीपाटीरपाटच्चरः
कार्णाटीगणकर्णपूरकलिकानि(?द्रा)भरद्रावकः ।
आभीरीकुचकुम्भघर्मकणिकाभूयस्सुगन्धीभव-
त्कस्तूरीमकरीपुरस्सरचरः प्रासः कदम्बानिलः ॥ २५ ॥
स्नात्वा सलीलं वियदम्बुराशौ प्रावृट्कृशाङ्ग्या भवनं व्रजन्त्या ।
निष्पीडितात्किन्नु वलात्पयोदचेलात्पयो निर्गलितं समग्रम् ॥ २६ ॥
नारायणक्ष्मारमणाय जैत्रप्रयाणवाचालतुरङ्गमाय ।
अमन्दमाङ्गल्यचिकीर्षयेव ततः समेता शरदम्बुजाक्षी ॥ २७ ॥
प्रावृट्कृशाङ्ग्याः सुतरां जरत्याः प्रापुः पयोदाः पलितानुकारम् ।
समुत्थितायाः शरदङ्गनाया मरालमञ्जीररवो बभूव ॥ २८ ॥

शृङ्गारलक्ष्मीर्मदनस्य राज्ञो नीराजनां विश्वजयाय तेने ।
तारावलिस्तत्र किलाक्षतालिः सम्पूर्णचन्द्रः कलशो बभासे ॥ २९ ॥

मदने कृतसन्धाने मित्रं प्राप्य निशाकरम् ।
भावालस इव श्रीमान् भानुः कन्यामशिश्रयत् ॥ ३० ॥

वल्लभस्य जलधेरयं रिपुः कुम्भजो मुनिरुदेति हा पुनः ।
चिन्तयेव शरदीति सिन्धवो लेभिरेऽति तनुतां दिनेदिने ॥ ३१ ॥

चण्डांशुशीतांशुविराजिनेत्रा काशैः प्रकाशैः कुमुदैः सहासा ।
शरद्वधूर्गौरपयोधरश्रीः सचेतसः कस्य मनो न जह्रे ॥ ३२ ॥

पराभूतनिश्शेषभूवल्लभाय प्रचण्डप्रतापाय नारायणाय ।
मरालीविरावैर्जयं कीर्तयित्वा सहर्षं शरत्प्रेयसी संप्रतस्थे ॥ ३३ ॥

अथ नारायणक्रीडादैर्घ्यसम्पादनाय किम् ।
रजनीं रचयन्दीर्घां हेमन्तऋतुरायर्यौ ॥ ३४ ॥

हेमन्तकालं समवाप्य मित्रं धनुः समाकर्षति पञ्चबाणे ।
संरक्षणार्थं दिननायकोऽपि समाललम्बे धनुरादरेण ॥ ३५ ॥

रविः स्वमहसा बोढुं परितापं किमक्षमः ।
उत्तरां दिशमुत्सार्य दक्षिणां दिशमाययौ ॥ ३६ ॥

नीहारसंभारनितान्तशीतं द्विजातिभिर्दत्तमपि प्रसह्य ।
हेमन्तमासे तरणिः प्रभाते सन्ध्यार्घ्यतोयं खलु नैव मेने ॥ ३७ ॥

हेमन्तावसरे सरोजनिकरैर्लीनं वने कैरवै-
र्निर्मुक्तं निधनैर्बलाङ्गवना मन्दाग्निनं भास्वता ।
उन्मीलन्नहमाप्यनेन महसा चन्द्रेण दीनाग्निनं
किं मे स्यादिति चिन्तयेव कलयं क्षीणोऽभवद्वासरः ॥ ३८ ॥

पूर्वानुबिम्बानसमागमेन शीतेन मन्दीकृतकान्तिपूरः ।
जानीमहे बालरविर्भानुः प्रातः करेणाम्बरमाललम्बे ॥ ३९ ॥

छन्नं सरोजैर्नवनेन शान्तं मानेन दृग्द्वन्द्वमङ्गनानाम् ।
इत्थं विदग्धान्नवनेन नुन्ना हेमन्तराज्ञिर्विनुन्दिताऽभूत् ॥ ४० ॥

क्षीरस्य बलाजनाम्बुदस्य चक्रकपोलं समाधुन्य निजाभरणं ।
स्तीर्णं वं पतितान्तरालय कान्तः प्रियां नीतपामास निर्गान्तकामान् ॥

मलिनीकृतयामिनीशबिम्बामिह नारायणसार्वभौमकीर्तिम् ।
परितो मिहिकामिषाद्वितन्वन्नपि हेमन्तऋतुः क्वचिज्जगाम ॥ ४२ ॥
नारायणमहाराजभजने मदनेरितः ।
समाजगाम शिशिरः प्रियालिङ्गनकौतुकी ॥ ४३ ॥
नलिनीविरहेषु पीडयन्मां भवताऽसौ मकरध्वजो निवार्यः ।
इति किं मकरं सरोजबन्धुः सपदि प्रार्थयितुं समाजगाम ॥ ४४ ॥
कर्णे कुन्दं वदनकमले पूगताम्बूलपूरं
मुक्ताहारं कुचपरिसरे चारुचैलं नितम्बे ।
सान्द्रानन्दे शिशिरसमये बिभ्रती पङ्कजाक्षी
यस्य क्रोडं भजति जनता तस्य भाग्यं ववन्दे ॥ ४५ ॥
अरुणस्य तुषारकम्प्रपाणिप्रचलत्तीक्ष्णकशाभिघातयोगात् ।
त्वरया परया हरेस्तुरङ्गाः प्रययुर्यत्तदभूद्दिनं लघीयः ॥ ४६ ॥
आलिङ्ग्य स्तनभारमादरभरादाचुम्ब्य बिम्बाधरं
वक्षाम्भोरुहमाकलय्य निबिडं निष्पीड्य कण्ठस्थलीम् ।
अन्योन्यं च निबध्य बाहुलतया निद्राणयोः कामिनो-
रित्थं कौतुकमीक्षितुं किमु चिरं दीर्घायते स्म क्षपा ॥ ४७ ॥
जग्राह नीहारमिषेण मन्ये नीलाम्बरं दिग्वनितासमूहः ।
ऊष्माऽपि पङ्केरुहलोचनानां वक्षोजसन्धिं ध्रुवमध्युवास ॥ ४८ ॥
विरेजिरे वल्लिषु कुन्दकोरकाः कुञ्जं श्रिताः शीतभियेव तारकाः ।
हिमानिलस्पर्शविमुक्तमुत्तमं सरोऽप्यनङ्गत्वममन्यताऽऽत्मनः ॥ ४९ ॥
जरामिव वहन्नङ्गे पिशङ्गदलकैतवात् ।
निर्गलत्कुन्ददशनः शिशिरोऽभूज्जरत्तरः ॥ ५० ॥
चिरपरिचितकुन्दं हन्त हातुं न योग्यं
कथमुदयपरं वा चूतमर्हेदुपेक्षाम् ।
इति तदुभयगाढप्रेमबद्धान्तरात्मा
परिहरति न यातायातखेदं स भृङ्गः ॥ ५१ ॥
नरपतिरवलोक्य तानृतूनां घनतरकौसुमसम्पदं प्रसन्नः ।
परमकृत रसालकीर्तिपूरैः सततवसन्तमहोत्सवं जगत्याः ॥ ५२ ॥

अट्टालिकारूढचकोरनेत्रा समीरलोलाम्बरपल्लवश्रीः ।
विद्योतते यत्र सुवर्णरम्भास्तम्भावनद्धेव महापताका ॥ ९ ॥
कामोत्सवोत्कण्ठितमानसाभिर्मदालसाभिः सह वल्लभाभिः ।
सौधाग्रभागेषु विहारभाजां यस्यां वितानीयति यामिनीशः ॥१०॥
पुरैरयोध्या मथुरा च मायानिधिः प्रकाशीकृतलोकहर्षा ।
उद्गतकाञ्चीरसिकावन्ती मनोहरद्वारवती पुरी या ॥ ११ ॥
विचित्रवादित्ररवैस्तुरङ्गहेषारवैर्वारणबृंहितैश्च ।
नित्यं सहस्रद्विजवेदघोषो यस्यां न शब्दश्रुतिमार्गमेति ॥ १२ ॥
अग्नित्रयीसम्भवधूमरेखा यस्यां समस्ताहुतिपुण्यगन्धा ।
उत्फुल्लनीलोत्पलपत्रलीला कर्णावतंसीयति दिग्वधूनाम् ॥ १३ ॥
विधाय वेणीं चमराणि यस्यां कक्षोभयोः [illegible] ।
दन्तांश्च मुक्ताः करसंज्ञयेव प्रीणन्ति वीथीषु वणिक्कुमाराः ॥ १४ ॥
सीतानुभिन्यातनयान्वितस्य समीरपुत्रेण निषेवितस्य ।
श्रीरामचन्द्रस्य मनोहरं या प्रासादमुच्चैस्तरमादधाति ॥ १५ ॥
भक्तिप्रकर्षोर्जितां जनानां विश्रान्तिचिन्तामणिमन्दिराणाम् ।
श्रीवासुदेवादिकदेवतानां प्रासादमाला विलसन्ति यस्याम् ॥१६॥
अधुनैव विलोकितेव वेगं नगरी विस्मयमातनोति [illegible] ।
अवलोकितमप्यनेकवारं पुनरेव प्रीतिरहो [illegible] ॥ १७ ॥
तत्रान्तरे यामिक एव कश्चित्कृताञ्जलिः [illegible] ।
मध्याह्नकालो [illegible] ॥ १८ ॥
निश्शङ्कमङ्के मिलितां जनानां छायां निरीक्ष्य [illegible] ।
भास्वानसावम्बरमध्यवर्ती [illegible] ॥ १९ ॥
पातुं विलोलरसनाः कुरङ्गाः पयांसि [illegible] ।
लघूकृताशा मनुजा इवामी [illegible] ॥ २० ॥

[illegible]
वारि [illegible] ।
[illegible]
[illegible] ॥ २१ ॥

घर्माम्भो नकुलस्य लेढि रसनाप्रान्तेन चक्षुःश्रवाः
स्वैरं केसरिणोऽपि बालहरिणः श्वासानिलं जिघ्रति ।
किं ब्रूमोऽम्बरमध्यचुम्बति (म्बिनि) परं भानौ तृषार्ता किमु
छायाप्युल्लसदालवालसलिले मूले तरोर्लीयते ॥ २२ ॥
कान्तानञ्चललोचनाञ्चलचमत्कारे विरामं गते
म्लाने कोमलचम्पके परमितो जैत्रा न मे मार्गणाः ।
[illegible]मस्तु कथं भवेदिति भिया जेयस्य निद्रामय-
[illegible] जगत्त्रयस्य मदनः प्रस्वापनास्त्रं दधौ ॥ २३ ॥
[illegible] स्फुटं वसुमती ज्वालान्प्रसूते हरि-
[illegible]नोति गगनं तापं विधत्ते पयः ।
[illegible] कश्चिद्दहो साडम्बरे भास्करे
[illegible] चन्द्रदृशां लीनो मनोभूरभूत् ॥ २४ ॥
[illegible]
[illegible] पुरोधाः ।
[illegible] मृगाणां
[illegible] विज्ञपयाम्बभूव ॥ २५ ॥
[illegible] ।
[illegible] ॥ २६ ॥
[illegible] ।
[illegible] ॥ २७ ॥
[illegible] ।
[illegible] ॥ २८ ॥
[illegible] ।
[illegible] ॥ २९ ॥
[illegible] ।
[illegible]
[illegible] ।
[illegible]

विधाय सम्यग्बलिवैश्वदेवौ यज्ञं पितॄणामपि धर्मशीलः ।
पादारविन्दं धरणीसुराणां प्रक्षाल्य राजाऽदित नित्यदानम् ॥३२॥
पङ्क्तेः पवित्रीकरणप्रवीणैर्मित्रैः सुहृद्भिः सह सच्चरित्रैः ।
हिरण्मये भोजनभाजनेऽसावभुङ्क्त नानाविधमन्नमीषत् ॥ ३३ ॥
भूपतेरथ सुखं निषीदतः पण्डितैः सह कलाविचक्षणैः ।
हास्यगर्भमभवत्परस्परं नैककौतुककथामहोत्सवः ॥ ३४ ॥

अत्रान्तरे निलययायिवयोविरावैः
शंसन्निव स्मरनरेन्द्रजयप्रयाणम् ।
चञ्चज्जपाकुसुमगुच्छसहोदरश्री-
र्भानुर्बभूव चरमाचलचूलचुम्बी ॥ ३५ ॥

सायन्तनीं कामपि वीक्ष्य शोभां प्रदत्तचित्तं गुरुविस्मयाय ।
नराधिपं कोऽपि जगाद विद्वान्नकालविज्ञोऽवसरं जहाति ॥ ३६ ॥
विधाय जाग्रत्कमलां त्रिलोकीं राजन्निदानीं जलधिं प्रयाति ।
पश्यायमन्तश्शयशौरिनाभीसरोजबोधाय सरोजबन्धुः ॥ ३७ ॥
वयस्यतीते रविणा समस्तं सन्यस्तमेतेन किमु प्रतीमः ।
काषायवासोधरणात्तथाहि विलोक्यते लोहितमूर्त्तिरेषः ॥ ३८ ॥
प्राचीं विहाय प्रचुरानुरागो यद्वारुणीं सङ्गतवान्पतङ्गः ।
असाविदानीं परमानुतापात्करोति पातं चरमाद्रिमौलेः ॥ ३९ ॥
पतङ्गसिंहे पतिते पयोधौ कोपादिव स्वप्रतिबिम्बजातात् ।
निरुन्धते दिग्वलयं समन्तान्नागेन्द्रनीलानि ततस्तमांसि ॥ ४० ॥

नवनवघननीलं वासरे नूनमूर्द्ध्व
रविकरनिकरेणालम्बितं यद्बभूव ।
अपरजलधिमध्ये मग्नमेनं विना त-
द्गगनमिव तमिस्रं भूतले पातमेति ॥ ४१ ॥

वने तमस्तोमघनेऽपि भीमे न गण्यते भीरभिसारिकाभिः ।
अभीष्टकार्ये गणयन्ति सन्तः किंचाऽन्तरायं ननु नान्तरीयम् ॥४२॥
मार्त्तण्डकान्तोपलमण्डलेभ्यो निर्गत्य यः पावकजालपूरः ।
हा चक्रवाकीहृदयानि भेजे तत्पूर्वधूमस्तिमिरं किमेतत् ॥ ४३ ॥

कालसर्पगरलाकुलीकृते नायके दिनकरे सरोजिनी ।
कुड्मलान्तरगतालिमण्डलीकैतवेन विषपानमाचरत् ॥ ४४ ॥

अस्तं गते त्विषां पत्यौ विशन्ति ज्वलनं त्विषः ।
स एव पतिरग्रेऽपि लभ्येत कथमन्यथा ॥ ४५ ॥

श्रीनारायण ते प्रतापदहनज्वालाकलापारुणं
प्रत्यक्पर्वतघर्षणोपलतटे सन्ध्यारुचोल्लेखितम् ।
अम्भोभिः शमितं निजैर्दिनकरं सौवर्णपिण्डं स्फुर-
त्तारारत्नचयं प्रदाय गगनाद्गृह्णाति रत्नाकरः ॥ ४६ ॥

वित्रस्तं तिमिरं चकोरनिकरा निर्बाधमानन्दिताः
सिन्धुर्बन्धुरितो विकासिकुमुदैरामोदिता मेदिनी ।
इन्दोर्यद्यपि नाम रश्मिनिचयैः सम्पादितं साम्प्रतं
सर्वं तावदिदं तथाऽपि जनता तं द्रष्टुमुत्कण्ठते ॥ ४७ ॥

सम्पादयन्सपदि कैरवकोशकारा-
गारे नियन्त्रितमधुव्रतवृन्दमुक्तिम् ।
निर्मोचयन्प्रियतमाकुचबन्धनानि
श्रीमानसावुदयते रजनीनरेन्द्रः ॥ ४८ ॥

पश्य प्राचीनशैले पवनवलयिनो धातुजन्मा परागः
शक्राशापङ्कजाक्ष्याः कठिनकुचतटे कुङ्कुमस्यानुरागः ।
आरक्तं नेत्रपेयं मधु रजनिवधूभालसिन्दूरबिन्दुः
कन्दर्पस्यात्मबन्धुर्विलसति जगदानन्दकन्दोऽयमिन्दुः ॥ ४९ ॥

[illegible]र्णाद्ग-
द्वेषाच्चुम्बि च येन तेन पतितः शीतद्युतेः शोणिमा ।
[illegible] स-
[illegible] त्रिभुवने मन्ये समुज्जृम्भते ॥ ५० ॥

[illegible] निशायां
[illegible] नटेन्द्रनीलम् ।
[illegible] सन्ततापप्रदीप-
[illegible] समुन्नतंशाति ॥ ५१ ॥

श्रीमत्कैरविणीवनं कमलिनीवृन्दं विमुक्तं श्रिया
सान्द्रानन्दधराश्चकोरनिकराः कोकाश्च शोकाकुलाः ।
शीतांशुर्नृप साम्प्रतं समुदितस्तिग्मांशुरस्तं गतः
संपत्तिर्जगतो विपत्तिरपि वा नैषा चिरस्थायिनी ॥ ५२ ॥

दिङ्मण्डलं तिमिरपङ्कघनं मयूखैः
प्रक्षालयन्निव तवोज्ज्वलकीर्त्तिपूरैः ।
इन्दुर्विलोकय जगद्विजयप्रयाण-
प्रारम्भकुम्भ इव भाति मनोभवस्य ॥ ५३ ॥

इत्थं तस्य गिरं निशम्य मुदितः काश्मीरकस्तूरिका-
पाटीरादिसुगन्धबन्धुरतरं कर्पूरदीपोज्ज्वलम् ।
आस्तीर्णप्रचुरप्रसूनविलसत्पर्यङ्कमुर्वीपतिः
सम्पूर्णीकृतपूगवीटिकमगादानन्दकेलीगृहम् ॥ ५४ ॥

श्रीमद्बागुलभूमिपालतिलकश्रीशाहनारायण-
स्फूर्जत्कीर्त्तिचरित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।
भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्येऽस्मिन्नगरद्धिकालकथकः सर्गोऽगमत्षोडशः ॥ ५५ ॥

॥ इति श्रीमदखिलभूपालमौलिमुकुटलालममालामरीचिवीचीचुम्बितचरणस-
रोजमयूरगिरिकेसरिश्रीमहाराजनारायणशाहोपोजितदाक्षिणात्यरुद्रकवी-
न्द्रविरचिते राष्ट्रौढवंशे महाकाव्ये श्रीनारायणनगरीमाहात्म्यवर्णनं नाम षोडशः सर्गः ॥

सप्तदशः सर्गः ।

अथ तत्र केलिभवने मनोहरे हरिणीदृशो नवविलासशालिनीः ।
नृपतिस्तृतीयपुरुषार्थवारिधेः परपारतारणतरीररीरमत् ॥ १ ॥
मन्मथोऽपि निखिलायुधप्रियालक्ष्यलक्षणनिरीक्षणक्षमः ।
मानलक्ष्यमनुलक्ष्य पत्रिणां सन्दधे धनुषि बाणमोहनम् ॥ २ ॥

काञ्चीकङ्कणरत्ननूपुरभवज्झाङ्कारकोलाहलै-
रुन्निद्रीकृतचित्तयोनिरलसोन्मीलन्मिलल्लोचना ।
घण्टाडम्बरचुम्बिकुञ्जरगतिः काऽपि प्रियाधिष्ठितां
मल्लीवल्लिपलाशपल्लवमयीं शय्यामयासीद्वधूः ॥ ३ ॥

सखीजनवचःशतैरियमहो नवोढा वधू-
रिदंप्रथममागता परि(र)मितः समालोकय ।
इमामतुलकौतुकाकुलमुरीकुरु प्रेयसी-
मिति प्रियसखी सखीमुपनिनाय तं कामपि ॥ ४ ॥

विम्बोष्ठचुम्बनविधौ विमुखीबभूव
क्रोडीकृतौ च गमनाभिमुखी बभूव ।
पाणिद्वयं च कुचकोरकयोर्दुधाव
स्पर्शे हठग्रहविधौ च सखीं जुहाव ॥ ५ ॥

निर्मोचने च न जगाम न वा जगाम
व्यालोकने च वदने नितरां ननाम ।
शय्यानिवेशनविधौ न न नेत्युवाच
प्रेमप्रसादवचने न किमप्युवाच ॥ ६ ॥

नीवीविमोचनविधौ च करं रुरोध
क्रोधेन भर्त्सनविधौ च दरं रुरोद ।
मुग्धाङ्गना यदपि काऽपि भयं बभार
प्राणेश्वरस्य च तथाऽपि मनो जहार ॥ ७ ॥

कामोन्मत्तसपत्नपद्मनयनासुस्निग्धभास्वन्नव-
व्यक्तालक्तकरक्तपादकमलन्यासाङ्कवक्षःस्थलम् ।
निर्यत्कज्जलनीललोचनजला लोलत्कपोलद्युतिः
सेर्ष्या काचन चञ्चरीकनयना भूपालमालोकत ॥ ८ ॥

लज्जयाऽपि सुतरामधोमुखी नूतनोढरमणी नराधिपम् ।
सौधरत्नचन्द्रयानुबिम्बितं रम्यवेषमनिमेषमैक्षत ॥ ९ ॥

धान्ते रम्यस्मारहारस्तवायं व्याजादेवं वक्षसि न्यस्तहस्ते ।
कान्ते किञ्चित्कुञ्चिताङ्गी नवोढा हारं दूरं लज्जयोज्झाञ्चकार ॥ १० ॥

आः प्राणेश मुहुर्विलोकयसि किं साश्चर्यमङ्गानि ते
किंवाऽपूर्वमिह प्रियेऽखिलजगल्लावण्यलक्ष्मीरिह ।
नेत्रे नाथ मुहुर्निमीलयसि किं दृग्दोषविच्छित्तये
नारीनायकयोरिति स्मितगिरस्तेनुः स्मरोत्तेजनाम् ॥ ११ ॥
मन्दकम्पितकरद्वयखेलत्कङ्कणक्कणविबोधितकामम् ।
पर्यरम्भि रमणेन विगाढं तत्र काऽपि रमणी रमणीया ॥ १२ ॥
कस्तूरिकाकुङ्कुमनीललोहितौ स्वयम्भुवौ वामदृशामुरोरुहौ ।
धरावलारातिरतीव शङ्करावपूजयच्चारु नखाङ्ककिंशुकैः ॥ १३ ॥
अधरोष्ठबिम्बमवलोक्य भूपतेर्निजनेत्रचुम्बनविलग्नकज्जलम् ।
विनिवर्त्तिताननसरोरुहा मुहुर्हसितं नियन्तुमशकन्न सुन्दरी ॥१४॥
भजते तव स्मितसुधानिदानतां मृगशावकाक्षि किमिहेति पृच्छतः ।
हृदयेश्वरस्य करदर्पणं करे वरवर्णिनी चतुरमुत्तरं ददौ ॥ १५ ॥
किं हालाहलदाहशान्तिविधये बालामुखेन्दुश्रितः
किं नारायणपार्थिवाय समुपानीतस्तया भीतया ।
कान्तानां कवरीभुजङ्गसदृशः सीमन्तवीथीफणा-
पर्यस्तो नु ललाटिकामणिरभात्केलीविमर्दश्लथम् ॥ १६ ॥
क्रीडाचक्रविहारवन्मुखविधोः कन्दर्पहिन्दोलवत्
प्रोदञ्चत्कुचकाञ्चनाचलविपर्यासे मुखेन्दुं प्रति ।
धावत्कामिमुखेन्दुयुग्मघटनासंभ्रान्तनक्षत्रव-
त्कान्ताया विपरीतकेलिकरणे हारः स दोलायते ॥ १७ ॥
सुतनुरुरु विभोरुरो निरोद्धुं घनपरिरम्भणदायिनी न सेहे ।
असहत न मृगीदृशोऽपि तुङ्गस्तनभरदूरनिवारितं नरेन्द्रः ॥ १८ ॥
वीर त्वदालोकनतो मृगाक्ष्याः पलायितुं वाञ्छति बाल्यमस्याः ।
तारुण्यमिच्छत्यधिवस्तुमेनां सखीति कस्याश्चिदमुं जगाद ॥१९॥
यदपि कुटिलिता मृगीदृशा भ्रू रतिपतिना तदनामि नाम चापम्
यदकृत दयिता तदातु हुंहुं मनसिजमार्गणमुक्तिहुंकृतं तत् ॥ २० ॥
गौराङ्गि कुर्याः कुचहेमकुम्भे मा चन्दनं मण्डनसम्भ्रमेण ।
कान्ते सुवर्णे रजतावलेपो हानिं परां प्रत्युत संविधत्ते ॥ २१ ॥

इत्थं निगद्य क्षितिपालमौलिः सानन्दमाचुम्ब्य कपोलपालीम् ।
परिस्फुरच्चम्पककोरकाङ्गीममन्दमालिङ्गदनङ्गकल्पः ॥ २२ ॥

न माल्यं धम्मिल्ले न च नयनयोरञ्जनरुचि-
र्न पत्राली गण्डे किमपि न च रागोऽधरदले ।
न चालेपो गात्रे न च कुचतटे हारलतिका
न च श्रोणौ काञ्ची तदपि तरलाक्ष्यः शुशुभिरे ॥ २३ ॥

अमन्दसीत्कारसमीरधाराविधूतदन्तक्षतवेदनानाम् ।
विलासिनीनां रतनिस्सहानां निद्राऽऽशु नेत्राभिमुखीबभूव ॥ २४ ॥

ततो वतंसोत्पलमुत्पलाशं किञ्चित्समुन्मीलनकैतवेन ।
मनोविरामं रजनीविरामं शशंस कर्णे वरवर्णिनीनाम् ॥ २५ ॥

चललोचनानि चललोचना जनाः स्फुटकैरवाणि च कुमुद्वतीचयाः ।
बत तुल्यकालमुभयानि चोभये चिररात्रिजागरवशादमीलयन् ॥ २६ ॥

समन्ततो मङ्गलतूर्यनादे दिक्चक्रवालेषु विजृम्भमाणे ।
वैतालिकाः कोमलकान्तवाचः प्रबोधयामासुरथ क्षितीशम् ॥ २७ ॥

जयजय क्षितिनायकमण्डलीमुकुटमण्डन भैरवनन्दन ।
दिनमुखश्रियमाशु विलोचनद्वयचमत्कृतिभिः सफलीकुरु ॥ २८ ॥

ध्वान्तस्तोमजिगीषया जिगमिषोर्मार्त्तण्डपृथ्वीपतेः
सन्ध्या ताम्रपटीकुटीव महती प्राभातिकी भासते ।
जानीमस्तिमिरस्य कीर्त्तय इव क्षीणाः क्षणात्तारका
जानाश्चाम्बुजिनीः पराभवभयादस्ताद्रिमालम्बते ॥ २९ ॥

किञ्चित्किञ्चिदुदञ्चिते दिनकरे वामभ्रुवां निष्प्रभाः
शृङ्गारा इव नेत्रहीनदयितस्याग्रे प्रदीपाङ्कुराः ।
मूर्खाणामिव मानसं न किमपि व्यालोकने कौशिक-
श्रेणी प्रोषितभर्तृकामुखकलामालम्बते कैरवम् ॥ ३० ॥

पद्मिनी दिनकरेण बोधिना जृम्भते भ्रमरवाग्प्रवर्षिणी ।
चक्रवाकवनिताऽपि वल्लभं दुर्लभं निशि निगम्य चुम्बति ॥ ३१ ॥

पूर्वाद्रिमाणिक्यविभूषणाय दत्त्वार्घ्यमम्भोजकबान्धवाय ।
समिन्धदीपा(मा)स्विषु भूमिदेवाः सन्ध्यां रविमुक्तनि मन्त्रपूतम् ॥ ३२ ॥

लक्ष्मीकान्त मुकुन्द माधव हरे श्रीराम सीतापते
गौरीवल्लभ भर्ग शङ्कर शिव श्रीकण्ठ मृत्युञ्जय ।
भो मातर्जगदम्ब पार्वति शिवे हेरम्ब लम्बोदर
स्वामिन् भास्कर पाहि मामिति मुहुः प्रातः स्मरन्ति द्विजाः॥३३॥
उत्तिष्ठ क्षितिपालभालतिलक श्रीसूर्यमालोकय
श्रीमन्नाथ गजाननाय महसे संप्रार्थयाभीप्सितम् ।
गोविन्दं कमलाविलासनिलयं श्रीराममाराधय
श्रीकण्ठं जगदीश्वरं पुरहरं चित्ते चिरं चिन्तय ॥ ३४ ॥
सायंप्रातरुदञ्चदङ्घ्रिकमलप्रक्षालनालालसः
स्नात्वा ताम्रतनुः परिक्षिपति यत्प्राच्यां प्रतीच्यां रविः ।
तन्निर्णेजनवारि यावकवतोर्यस्याः पदाम्भोजयोः
सन्ध्याबुद्धिमिहातनोत्यनुदिनं तामम्बिकां पूजय ॥ ३५ ॥
इत्यनिन्द्यनुतिगीतिमङ्गलैर्वन्दिनन्दनजनैः प्रबोधितः ।
सन्मतिः सपदि मेदिनीपतिर्मुञ्चति स्म कमनीयमञ्चकम् ॥ ३६ ॥
सवनादिकर्मणि कृते सकलं मुकुरादिमङ्गलमवेक्ष्य पुरः ।
अतिथिप्रियो विरचिताभरणः श्रवणातिथिं तिथिमसावकरोत् ॥३७॥
ततः समागत्य नयप्रधानाः प्रणेमुरेनं प्रकृतिप्रधानाः ।
धराधिपः सुन्दरदृङ्निपातैः स्वस्वाधिकारेषु च तानयुङ्क्त ॥ ३८ ॥
नित्यं प्राच्यप्रतीच्यक्षितिधरकुचयोर्यद्गुणग्रामदाम-
प्रोद्यत्कीर्त्तिमुक्ताफलपटलसत्तारहारं दधाना ।
वीरश्रीशाहनारायणधरणिपतिश्रेणिकोटीरहीरे
धीरेऽस्मिन्सानुरागा समजनि सुतरां मेदिनी कामिनीव ॥३९॥
श्रीमद्बागुलभूमिपालतिलकश्रीशाहनारायण-
स्फूर्जत्कीर्त्तिचरित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।
भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्येऽस्मिन्नगमन्मुनीन्दुगणितः सर्गो विहारोत्सवः ॥ ४० ॥

॥ इति श्रीमदखिलभूपालमौलिमुकुटललाममालामरीचिचुम्बितचरणसरोजस-
सूरगिरिकेसरिश्रीमहाराजनारायणशाहोयोजितदाक्षिणात्यरुद्रकवीन्द्रविर-
चिते राष्ट्रौढवंशे महाकाव्ये कामक्रीडाप्रातःकालवर्णनं नाम
सप्तदशः सर्गः ॥

अष्टादशः सर्गः ।

अथ नारायणः श्रीमानाम्निर्की निगमुद्वहन् ।
धर्माननेकशः कर्तुमचीक्रमत सादरम् ॥ १ ॥
भूपतिश्चिश्चिलिग्रामे गगनोदरचुम्बिनम् ।
अकरोन्मुकुटोदारं प्रासादं चारुमण्डपम् ॥ २ ॥
तत्र विश्वेश्वरं साक्षात्तथा विष्णुं चतुर्भुजम् ।
पुरस्कृत्य महीदेवान्पार्थिवः प्रत्यतिष्ठिपत् ॥ ३ ॥
सम्पूज्य विधिवद्भूयो गिरीशपुरुषोत्तमौ ।
गोभूमिरत्नकनकैर्ब्राह्मणानप्यपूपुजत् ॥ ४ ॥
यथाविधि कृतैर्होमैः प्रीणयित्वा दिवौकसः ।
नृपतिर्विविधै रत्नैर्भूसुरानप्यतर्पयत् ॥ ५ ॥
इति सम्पूज्य भूदेवान्स दत्तसफलाशिषः ।
स्वकीयमगमत्सौधं निरन्तरमहोत्सवम् ॥ ६ ॥
अथ जैत्रपुरे रम्ये श्रीवावेश्वरसन्निधौ ।
अग्निष्टोमाभिधं यागमचिकीर्षन्महीपतिः ॥ ७ ॥
इच्छामात्रसमानीतसामग्रीहृष्टमानसः ।
ज्योतिष्टोमाख्ययागस्य स सम्भारानचीकरत् ॥ ८ ॥
अथ क्षितिपतिर्विश्रद्दनेन विधोः कलाम् ।
अष्टमूर्तेरभून्मूर्तिरष्टमी विजितेन्द्रियः ॥ ९ ॥
ब्रह्मादिषोडशर्त्विग्भ्यः प्रादाद्दशविधं पदम् ।
वरणाङ्गतया यज्वा यज्ञविद्याविशारदः ॥ १० ॥
सहितः षोडशर्त्विग्भिश्चित्रमाल्यानुलेपनः ।
व्यराजत्पार्थिवः पर्वशर्वरीसार्वभौमवत् ॥ ११ ॥
वरणोचितसम्भारसम्भ्रमानन्दविस्मिताः ।
ऋत्विजो यज्ञविद्यैव किमायातेति मेनिरे ॥ १२ ॥
धृतैणचर्मशृङ्गोऽपि स विसर्जितकुन्तलः ।
केनापि तेजसा यज्ञमण्डपे मण्डितोऽभवत् ॥ १३ ॥

to the town of Jaitrapura, Nârâyana Shah engaged the enemy with his archers, who killed the warriors of the opposing army with showers of arrows. The enemy fled away, leaving on the field flags, horses, elephants and treasures which were looted by the victorious army of Nârâyana Shah Nârâyana Shah only took the banners of the enemy and the royal elephants Other things were allowed to remain with his warriors, who were moreover favoured with grants of villages, jewels, precious clothes and gold

Nârâyana Shah now set out with his harem on a pilgrimage to Nasik. A Mahommedan officer came there to collect the tax from pilgrims He was thrown into the river by the soldiers of Nârâyana Shah, who however taking pity on him dragged him out. After bathing in the river, he gave much wealth to the Brâhmanas and worshipped the gods Sundares'vara and Kapâli Mahes'vara. He also worshipped at Panchavatî the image of Râma with Lakshmana on the right, Sitâ on the left and Hanumân with folded hands in the front. From Devasthâna, he sent his harem with his son-in-law Mangalajit and his Brâhmana S'arngadhara to Mayûragiri.

With a desire to take the kingdom of Javâri, (Javar) he went with his army to Pithapura (Pemt). The king of Javâra whose capital was looted by the advance force of Nârâyana Shah came to him trembling with fear, with straw in his mouth and axe on his neck, and fell at his feet He requested Nârâyana Shah to take some villages and give him back his kingdom Making thus the king of Javâri his feudatory, Nârâyana returned to Râmnagar, the capital of Râmadeva. Hearing the fate of the king of Javâri, Râmadeva appeased him by giving him horses, elephants, and the fort of Pendavala.

Gangadâsa, father of Mangalajit, son-in-law of Nârâyana Shah, requested Nârâyana Shah, who had encamped near Khâmalpura on a hunting tour, to put Mangalajit on the throne of Vâsudevapura which was wrested from him by his elder son Tanadâsa Making his way through dense forests by felling the trees with axes and tusks of elephants, he reached Vâsudevapura, and filling the surrounding ditch with wood and stone, took the town, looted its

दीक्षितो न ददातीति श्रुतिप्रामाण्यभङ्गभीः ।
राजा मनोरथैरेव दानव्यसनमाश्रुत ॥ १४ ॥
यज्ञाधिकारपशुना समिज्य विधिमार्गतः ।
आग्नीषोमीयपशुना नारायणनृपोऽयजत् ॥ १५ ॥
न हिंस्यादिति वाक्येन लौकिक्येव निषिध्यते ।
हिंसा वैधी तु तद्भिन्ना न निषेधस्य गोचरः ॥ १६ ॥
घृताहुत्युज्ज्वलस्फूर्जदग्निज्वालोष्णविग्रहः ।
दामांशुबद्धपशुको यूपः सूर्य इवावभौ ॥ १७ ॥
दर्भसन्दर्भधम्मिल्ला तनुमध्या सुमेखला ।
पुरोडाशस्तना वेदिर्विरराज वधूरिव ॥ १८ ॥
औदुम्बरी महावेदिः स्थिता रेजे नवांशुका ।
प्राग्वंशमण्डपं रम्यं वरीतुमिव सङ्गता ॥ १९ ॥
अग्रहीदथ विक्रेतुः सोमं राजा गवादिना ।
अम्बुधेरिव मन्थाद्रिरज्ज्वाकर्षेण माधवः ॥ २० ॥
आरब्धवानथातिथ्यं सर्वप्रकृतिधर्मवित् ।
प्रमाणादिप्रसङ्गान्तद्वादशाध्यायतत्त्ववित् ॥ २१ ॥
ईजिरे ऋत्विजः प्रातःसवने वपया ततः ।
पुरोडाशेन मध्ये तु तृतीये हृदयादिभिः ॥ २२ ॥
अनडुन्नवचर्मात्तसोमाभिषवशब्दतः ।
आविरासीदथोत्साहः कोऽपि पुण्यस्य यज्वनः ॥ २३ ॥
हवींषि यजमानस्य जायया वीक्षितानि ते ।
अग्नौ कृतप्रणयने जुहवामासुरृत्विजः ॥ २४ ॥
अभ्रंलिहैरिवाहूता धूमैराहुतिगन्धिभिः ।
इन्द्रादिदेवता जक्षुर्मन्त्रपूर्वं हुतं हविः ॥ २५ ॥
ग्रहैर्दशभिरध्वर्युर्जुहाव हविरादृतः ।
चमसाध्वर्यवः सोमं चमसैर्जुहुवुर्मुदा ॥ २६ ॥
सदो मण्डपमध्यस्थाः सोमपानं वितेनिरे ।
नारायणमहाराजप्रसादादृत्विजो मुदा ॥ २७ ॥

नारायणमहाराजश्चिरं जीवतु भूतले ।
सोमपानभवानन्दपूर्णा इत्याशिषं ददुः ॥ २८ ॥
ग्रावस्तुत्सोमपानार्थी कात्यायनमुनेर्मतम् ।
उत्थाप्य दूषयामास कुमारिलमतं श्रयन् ॥ २९ ॥
ऋत्विग्मण्डलसङ्कीर्णस्य मण्डपस्यावनीपतिः ।
श्रियं कामपि संवीक्ष्य घनानन्दमविन्दत ॥ ३० ॥
यत्र सोमसुधापानं कर्तुमिन्द्रः समागतः ।
नातः परतरं तीर्थमित्यूचुः सदसि स्थिताः ॥ ३१ ॥
केवलं स्वर्गिणः स्वीयाः पूर्वजा नामुना कृताः ।
ऋत्विजामपि सभ्यानामामुष्मिकफलालयाः ॥ ३२ ॥
अथाद्यर्त्विक्चतुष्काय गवां द्वादशकं नृपः ।
प्रत्येकं व्यतरद्वैधं तृणीकृतसुरद्रुमः ॥ ३३ ॥
द्वितीयर्त्विक्चतुष्काय प्रत्येकं गोचतुष्टयम् ।
यच्छति स्म कलौ कर्णः शतक्रतुनिभो नृपः ॥ ३४ ॥
तुरीयर्त्विक्चतुष्काय प्रत्येकं गोत्रयीमदात् ।
विध्युक्तां दक्षिणामेवं व्यभजद्गोशतं नृपः ॥ ३५ ॥
ततः स कनकं प्रादादात्रेयाय द्विजन्मने ।
असङ्ख्यातद्विजेभ्यस्तु व्यतरद्भूरिदक्षिणाम् ॥ ३६ ॥
ग्रहादियज्ञपात्राणि गृहीत्वा सपरिग्रहः ।
राजावभृथयज्ञाय रथारूढो नदीमगात् ॥ ३७ ॥
विजेतुमिव संसारविपक्षमभिषेणयन् ।
व्यरुचन्नृपतिस्तूर्यघोषं घुष्टजयारवः ॥ ३८ ॥
विधायावभृथेष्टिं स व्यसृजत्सलिलाशये ।
सोमावलिप्तपात्राणि ततः स्नानमुपाचरत् ॥ ३९ ॥
नाभूदवभृथस्नानात्पूतात्मा केवलं नृपः ।
सह स्नानं प्रकुर्वन्तः सर्वेऽपि जगतीसुराः ॥ ४० ॥
दीक्षाविमोकमादाय नारायणमहीपतिः ।
व्यधादुदवसानीयामिष्टिमृत्विक्समन्वितः ॥ ४१ ॥

विधाय विधिमार्गेण प्रापणीयेष्टिमप्यसौ ।
समकल्पयदानन्दसिन्धुर्ब्राह्मणतर्पणम् ॥ ४२ ॥
नारायणमहीपालः कलिकालविजित्वरः ।
अनिवारितमन्नानि भूमिदेवानभोजयत् ॥ ४३ ॥
भूमिभिर्भूषणैः स्वर्णैर्वसनैरशनैर्गृहैः ।
सकलानपि भूदेवान्भूपालः पर्यपूजयत् ॥ ४४ ॥
अथ पत्नीयुतो राजा मयूरगिरिमण्डनम् ।
धर्ममूर्त्तिः समायातः सुन्दरं राजमन्दिरम् ॥ ४५ ॥
ततः कदाचिदानन्दभाजनीकृतभूजनः ।
तुलापुरुषदानानि कर्त्तुमैहत पार्थिवः ॥ ४६ ॥
अस्योत्कटतुलादानविधिकर्मविभाविनः ।
अमुष्य वपुषः पुष्टिमाशासत महीसुराः ॥ ४७ ॥
वेदवेदाङ्गपारीणानाहूय सकलद्विजान् ।
तुलापुरुषदानस्य सङ्कल्पमकरोन्नृपः ॥ ४८ ॥
सम्पूज्य विधिवत्पूतः सम्पूर्य धनसम्पदा ।
नारायणमहाराजस्तुलामध्यास्त निस्तुलः ॥ ४९ ॥
कस्तूरीतिलकोद्भासिभालभागस्तुलागतः ।
नृपः सर्वकलापूर्णः सुधाकर इव व्यभात् ॥ ५० ॥
राजा तुलागतः सर्वद्विजानन्दकरोदयः ।
विपक्षध्वान्तविध्वंसी सहस्रांशुरिव व्यभात् ॥ ५१ ॥
हेम्नो यदभवद्दुःखं गुञ्जया सह तोलनात् ।
तदपास्तमभूदस्य नृपेण सह तोलनात् ॥ ५२ ॥
तुलागतमहाराजनारायणमुखश्रियम् ।
कामप्याकर्ण्य शीतांशुः शङ्कया मलिनाननः ॥ ५३ ॥
विष्णोरंशेन चानेन हेम्नः संतोलनोचिता ।
ख्यातं भगवतोक्तं नु धातूनामस्मि काञ्चनम् ॥ ५४ ॥
सुवर्णं पीतमेवेति युक्तं मीमांसकोदितम् ।
अन्यथाऽनभिभूतस्याभिभूतेन कुतस्तुला ॥ ५५ ॥

ततः क्षितिपतिस्तस्मै दक्षिणामददत्तदा ।
सुवर्णभूपिता धेनूर्हैमटङ्कांश्च भूरिशः ॥ ७० ॥
अथ रुद्रप्रसादाप्तसम्पदारोग्यसन्मतिः ।
द्विजानाहूय रुद्रस्य प्रारम्भमकरोन्नृपः ॥ ७१ ॥
प्रसूनतारापतिशालिमौलिः पाटीरभूतिस्पृहणीयगात्रः ।
ज्वलत्प्रतापानलमादधानो महीपतिः शम्भुरिव व्यराजत् ॥७२॥
विष्णो(रंशा)त्मनानेन शिवोऽहमिति भाविते ।
माधवोमाधवाद्वैते विश्वासः कस्य नाभवत् ॥ ७३ ॥
मेखलागुणनियन्त्रितमध्या पूर्णभूषितपयोधरकुम्भा ।
सङ्गता हुतहुताशनयूना कुण्डभूः प्रियतमेव विरेजे ॥ ७४ ॥
उदुम्बरादिद्रुमतोरणाढ्यः स्फुरत्पताकाकदलीसलीलः ।
शिवस्य सान्निध्यवशेन तुल्यः कैलासशैलेन स मण्डपोऽभूत् ॥७५॥
महीसुरा होमविधिं वितेनिरे दिवौकसस्तत्र हविर्बवल्भिरे ।
धनश्रियो भूमिपतेर्जजृम्भिरे सुमेरुमुख्या धनिनश्चकम्पिरे ॥७६॥
नरपतिर्नितरां मुदितं रवेर्वदनयोरपि युग्ममतर्पयत् ।
जपदशांशतया परमेकतो विगतसंख्यतया पुनरन्यतः ॥ ७७ ॥
एतेन क्षितिपालमौलिमणिना रत्नैर्धनैर्धेनुभिः
सौवर्णाभरणैरनेकवसनैः सम्भाविता इत्यमी ।
दारिद्र्यं किमु नः प्रदग्धममुना राज्ञः प्रतापाग्निना
किंचात्रागतरुद्रनेत्रशिखिना विप्राः स्म संशेरते ॥ ७८ ॥
अनेन धन्येन नितान्तमान्यैर्गजाश्वदानादिकभूमिदानैः ।
सर्वाणि दानप्रतिपादकानि शास्त्राणि सार्थानि चिरात्कृतानि ॥७९॥
आपूर्वाचलपश्चिमाचलयुगादाचन्दनक्ष्माधरा-
दागौरीगुरुभूधरादपि महीं सम्पादयन्विप्रसात् ।
कुर्वन्वैरिनरेन्द्रवृन्दरुधिरापूरैः शतं सागरा-
न्कीर्त्तिं भार्गवतोऽधिकां समचिनोन्नारायणक्ष्मापतिः ॥ ८०

पर्यान्वितं श्रीयमुनोपकण्ठे कृत्वा निवासं शिखिशैलराजः ।
पटोपकार्यां रचितोपचारां दत्तोपहारां सुखमध्यतिष्ठत् ॥ ३७ ॥
कुबेरद्विजभूमिपतेः कुमारो दिने दिने प्रेषयति स्म तस्मै ।
खाद्यान्यनेकानि तथा सुगन्धिद्रव्याणि चान्यानि मनोहराणि ॥३८॥
तयोर्महीमण्डनयोस्तदानीमभूदवृत्तान्यकथाप्रसङ्गा ।
दिने दिने कापि च वर्धमाना संवादसन्दोहकुतूहलश्रीः ॥ ३९ ॥
अथान्तरे शाहमुरादनृपमापृच्छ्य नारायणभूमिपालः ।
रेवातटे माधवकृष्णभू(?पू)तं ससैनिकः प्रास्थित शुक्लतीर्थम् ॥ ४० ॥
तत्तीर्थमासाद्य नृपः प्रभाते तुङ्गं पटागारमथो वितत्य ।
समागतैस्तैर्निकविप्रवृन्दैरावेष्टितः स्नानसमुत्सुकोऽभूत् ॥ ४१ ॥
कराम्बुजं शार्ङ्गधरद्विजस्य तथाऽन्यतो लक्ष्मणपण्डितस्य ।
प्रेम्णा समालम्ब्य करद्वयेन स नर्मदावारिणि मङ्क्तुमागात् ॥ ४२ ॥
यथाविधि स्नानविधौ प्रणीते विधाय सन्ध्यापितृतर्पणादि ।
सद्यः समस्तेप्सितदानसिद्धं गोपालमन्त्रं जपति स्म राजा ॥ ४३ ॥
महीपतिस्तत्र यथाविधानं महाष्टदानादिविधिं विधाय ।
गवां शतं काञ्चनमालिनीनां धनं धनं च व्यतरद्द्विजेभ्यः ॥ ४४ ॥
भूमीभुजा भूरिसुवर्णवृष्ट्या पीते कृतेऽस्मिन्सति शुक्लतीर्थे ।
न ज्ञातवानस्मि किमद्य मार्गं व्यासः समेतोऽपि मुहुर्मुमोह ॥ ४५ ॥
सुवर्णभारं ददतोऽस्य राज्ञो रत्नाङ्गुलीयं सुतरां विरेजे ।
चिन्तामणिस्तत्करदानदीक्षाशिक्षार्थमायात इति प्रतीमः ॥ ४६ ॥
पूर्वं हि चाणाख्यनृपेण तीर्थे यत्रोद्धृतं तत्र नराधिपेन ।
द्विजन्मनां दत्त······भाग्यं चिरस्य कालादुदधारि भूयः ॥ ४७ ॥
हुङ्कारविश्वेश्वरमादिदेवं श्रीश्वेतवाराहमहेश्वरं च ।
रत्नैः सुवर्णैर्विविधोपचारैरपूजयत्तत्र नृपो यथावत् ॥ ४८ ॥
सानन्दमन्यानपि देववर्यान्सम्पूज्य नारायणसार्वभौमः ।
सहस्रशस्तत्र च भूमिदेवानभोजयन्नर्मदतीरदेशे ॥ ४९ ॥
आकर्ण्य नारायणभूमिभर्तुर्लोकोत्तरं दानकुतूहलं तत् ।
तत्तीरमधिष्ठाय मुरादशाहो विलोकितुं सत्वरमाजगाम ॥ ५० ॥

तद्दर्शनाद्विस्मयदत्तचित्ते तस्मिन्गते शाहमुरादभूपे ।
आचार्यगङ्गाधरमुख्यविप्रान्नृपः समाहूय बहूनवादीत् ॥ ५१ ॥
दिल्लीशसूनुप्रणयानुरोधात्तूर्णं भृगुक्षेत्रमहं व्रजामि ।
युष्मान्वृणोमि प्रयतानिदानीं गोपालमन्त्रस्य जपाय विप्राः ॥५२॥
एतस्य मन्त्रस्य जपं भवद्भिर्होमादि सर्वाङ्गयुतं विधाय ।
तस्मिन्भृगुक्षेत्रपुरे मदर्थं श्रेयः प्रदातुं क्रियतां प्रसादः ॥ ५३ ॥
तथेत्युरीकृत्य नरेन्द्रवाचं हर्षप्रकर्षोज्ज्वलवक्त्रशोभाः ।
आरेभिरे मन्त्रजपं यथावद्रेवातटे मन्त्रविभागविज्ञाः ॥ ५४ ॥
ततो भृगुक्षेत्रमुपेत्य राजा सोमेश्वरं पूजयति स्म सम्यक् ।
स्वप्ने वितीर्णप्रचुरप्रसादां सर्वोपचारैरथ सिन्धुदेवीम् ॥ ५५ ॥
परस्परालोकनजायमानलोकोत्तरानन्दकुतूहलश्रीः ।
भूमण्डलाखण्डलयोस्तदानीमखण्डिता काऽपि पुनर्बभूव ॥ ५६ ॥
क्रीडाप्रसङ्गेन ततः कदाचिन्नारायणाय क्षितिनायकाय ।
प्रचण्डदन्तावलयूथयुद्धं सन्दर्शयामास मुरादशाहः ॥ ५७ ॥
तत्रान्तरे निर्मलशुक्लतीर्थादुपागतेभ्यो धरणीसुरेभ्यः ।
रेवातटे धाम्नि पितामहस्य श्रेयोऽर्थमौरवभूपसूनुः ॥ ५८ ॥
पद्मैः समेतं दशभिर्महीन्द्रः सुवर्णटङ्कद्वितयं द्विजेभ्यः ।
सम्पाद्य पूजामथ दक्षिणार्थं सानन्दमेकैकमदादुदारः ॥ ५९ ॥
ततः परं शाहमुरादवीरो मयूरशैलं प्रति गन्तुकामम् ।
विज्ञाय नारायणराजसिंहं संभावयामास सवीरवर्गम् ॥ ६० ॥

वासांसि सद्गुणितानि नृपोचितानि
श्रीमन्ति मूल्यरहितानि च भूषणानि ।
स्वीयकाञ्चननिबद्धपिधानकोशं
[illegible]मानमतुलं करवालमेकम् ॥ ६१ ॥
दानाम्बुगन्ध[illegible]मिलिन्दवृन्द-
[illegible] ।
[illegible]
[illegible] ॥ ६२ ॥

यथोचितं भैरवनन्दनस्य प्रवीरवर्गानपि भूरिहर्षान् ।
वस्त्रैः सुवर्णैर्मणिभिस्तुरङ्गैः सम्भावयामास मुरादशाहः ॥ ६३ ॥
अथ तत्र कुबेरदिग्नियन्तुः सुतमामन्त्र्य पवित्रनम्रमूर्तिम् ।
शिखिभूधरवर्त्तिराजधानीमगमद्भैरवनन्दनः ससैन्यः ॥ ६४ ॥
श्रीशाहनारायणविप्रयोगादकव्वरक्षोणिपतेः कुमारः ।
नितान्तचिन्ताकुलमानसोऽभूत्सतां वियोगाद्धि परो न खेदः ॥६५॥
तापीतटे पिप्पलवाटिकापुरीमासाद्य नारायणमेदिनीपतिः ।
स्नानादिकं तीर्थविधिं यथोदितं तत्रापि कृत्वा विघसं स सेवते॥६६॥
तत्रैकरात्रं प्रणयादुषित्वा सवारिसङ्घं पुनरभ्युपेतः ।
अत्रान्तरे दर्शनलोलचित्तः प्रतापशाहोऽपि पुरः समेतः ॥ ६७ ॥
प्रतापशाहो मुदिताननश्रीर्गुरोरवन्दिष्ट पदारविन्दम् ।
तत्रत्यवृत्तान्तममुं सुताय न्यवेदयत्सर्वमथ क्षितीशः ॥ ६८ ॥
नीराजितः पौरसुवासिनीजनैः सनन्दनो वन्दिजनाभिनन्दितः ।
गृहे गृहे बद्धदुकूलतोरणां पुरीं विशालामविशद्विशाम्पतिः॥६९॥
उन्मीलत्कीर्तिपूरं मलयजमधुरं दिग्वधूनां वितन्वन्
जातीमल्लीमतल्लीविकसितकुसुमस्तोमकर्णावतंसन् ।
कुर्वन्नानन्दसान्द्रानपि निखिलजनान्नीतिभिर्मानवीभिः
प्राज्यं साम्राज्यसौख्यं सततमभजत श्रीयमाम्बातनूजः ॥ ७० ॥
श्रीमद्वागुलभूमिपालतिलकश्रीशाहनारायण-
स्फूर्जत्कीर्तिचरित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।
भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्येऽकव्वरसूनुसङ्गरसिकः सर्गोऽङ्कभूमीमितः ॥ ७१ ॥

॥ इति श्रीमदखिलभूपालमौलिमुकुटललाममालामरीचिवीचिचुम्बितचरणसरो-
जमयूरगिरिकेसरिश्रीमहाराजनारायणशाहोयोजितदाक्षिणात्यरुद्र-
कवीन्द्रविरचिते राष्ट्रौढवंशे महाकाव्ये शाहमुरादसमागम-
कौतुको नाम एकोनविंशतितमः सर्गः ॥

विंशः सर्गः ।

ततः शरत्कालमवाप्य दिल्लीपतेः सुतो दक्षिणदिग्जयाय ।
जगाम सैन्यैः सह दूतमेकं प्रस्थाप्य नारायणपार्थिवाय ॥ १ ॥
कुबेरदिङ्नाथतनूजदूतः समेत्य सद्यः शिखिराजधानीम् ।
कृतप्रणामो निहितोपहारः श्रीशाहनारायणमित्थमूचे ॥ २ ॥
महीपतेः शाहमुरादभूपः प्रतीक्ष्य कालं भवतोपदिष्टम् ।
निजामशाहक्षितिपालदेशं सम्प्रस्थितः सम्प्रति सैन्ययुक्तः ॥३॥
तस्मिन्महाकर्मणि राजसूनुः सहायमाकाङ्क्षति जित्वरं त्वाम् ।
सा दक्षिणा दिक् क्षितिपालमौलेस्तव प्रतापेन विना न जेया ॥४॥
मत्स्वामिनः कार्यमकर्तुमेतद्भवानहो नार्हति सर्वथैव ।
केषां न किं किं कृतमार्यवर्यैः सहायकार्यं भवदीयपूर्वैः ॥ ५ ॥
विजित्य दिल्लीपतिपार्थिवाय दत्ते त्वया दक्षिणदिक्प्रदेशे ।
गास्यन्ति सर्वेऽपि यशस्तवोच्चैरतः परः को ननु दीर्घलाभः ॥६॥
जयोदयो याम्यदिशः समन्तात्पीयूषपूरोपमकीर्त्तिलाभः ।
अकब्बरो मित्रमिति त्वदीयां सौभाग्यशोभां न सहोऽस्मि वक्तुम् ॥७॥
अलं विलम्ब्य क्षितिपालमौले तुरङ्गमङ्गीकुरु सांयुगीनम् ।
आलिङ्गितुं त्वां तरसा जयश्रीरुत्कण्ठते वासकसज्जिकेव ॥ ८ ॥
आदाय तां दूतवरस्य वाचं नम्रं निषण्णं निकटे नृपस्य ।
प्रतापशाहं प्रभयाऽनुमेया समाययौ काचन वीरलक्ष्मीः ॥ ९ ॥
निरन्तरध्यातमुरारिमूर्तिर्वीरश्रियाऽऽलिङ्गितचारुमूर्तिः ।
प्रतापशाहः प्रथितप्रतापः प्रणम्य राजानमिदं न्यगादीत् ॥ १० ॥
आर्य त्वया दिग्वलयं विजित्य स्वयं यशोभिः समपूरि भूरि ।
इह प्रतापं विनियुज्य कार्ये कीर्तिं तदेकांतरितां विधेहि ॥ ११ ॥
तव प्रभावादनुलेपिकार्ये भृत्यो लघीयानपि नैति भङ्गम् ।
भूपालपञ्चानन तावकीने कुतः किशोरे विजयान्यशङ्का ॥ १२ ॥
ममापि नायं जननाथ धर्मो यद्विद्यमाने मयि यूनसूनौ ।
सहस्रशो निर्जितवैरिवृन्दः पुनः प्रयासि त्वमरीन्विजेतुम् ॥१३॥

wealth and set it on fire. Tânadâsa fled for his life from forest to forest. The town of Vâsudevapura was rebuilt and Mangalajit was crowned as its ruler.

Burhan Shah[1] sought the help of Nârâyana Shah for conquering the southern country. Nârâyana marched with his army to Vatagrâma, near the Gâlana fort He sent from there half of his forces to join Burhan Shah and he himself remained in the village, obstructing the path of the enemy's forces Nârâyana Shah's army defeated the enemy and crowned Burhan Shah as the king of the southern country. Burhan Shah sent many presents to Nârâyana Shah, who now looted the towns lying on the borders of Mt. Gâlana.

Cantos 14 to 17 are taken up with conventional poetical descriptions of amorous sports in the spring, playing in water, seasons, the capital, the noon-time, the setting sun, sexual pleasures and the morning.

Nârâyana Shah erected in the village of Chinchili a magnificent temple and there he got installed the images of gods Vis′ves′vara and Vishnu. In the town of Jaitrapura before the god Bâbes′vara he preformed the Agnishtoma sacrifice and gave to the Brâhmanas land, golden ornaments, clothes, dinners and houses On another occasion he got himself and his family weighed against gold and jewel and distributed it among the Brâhmanas Once he went to the temple of Mangatunges′vara and there he made the gift of the hides of black antelopes and performed the Rudra sacrifice. In this canto the poet, while describing the sacrifices, has shown his knowledge of the Pûrvamîmânsâ and the sacrificial literature.

Murad Shah, son of Akbar, encamped with his army in Bhrigupura (Broach) for conquering the kingdom of Nizam Shah[2] Akbar had given him a letter to Nârâyana Shah ordering him to join Murad in his expedition in the south, with a present of a pair of valuable Kashmir cloths and a white horse. Murad Shah sent one of his warriors with the letter to Nârâyana Shah.

1 Burhan Nizam Shah of Ahmednagar

2 Vide Briggs' Ferishta vol III pp. 291 301

इति ब्रुवाणाय बृहद्भुजाय निवारितायापि कृताग्रहाय ।
प्रतापशाहाय महीमहेन्द्रस्तथेति सन्देशमदात्तदानीम् ॥ १४ ॥
श्रीशाहनारायणराजसिंहं गङ्गाभिधानां जननीं च नत्वा ।
आपृच्छ्य सर्वानपि बन्धुवर्गानसावगाच्छार्ङ्गधरस्य गेहम् ॥ १५ ॥
तत्रैष नारायणराजसूनुः सम्प्राप्तमन्त्राक्षतमङ्गलश्रीः ।
सलक्ष्मणं शार्ङ्गधरद्विजेन्द्रं प्रणम्य चालिङ्ग्य चिरादनन्दत् ॥ १६ ॥
राष्ट्रौढवंशे तिलकायमानः पितेव राजन्विजयीभवेति ।
भूदेवयोर्द्रागनयोरुदारां प्रसन्नयोराशिषमग्रहीत्सः ॥ १७ ॥
दिगन्तरालं रणतूर्यनादे विगाहमाने विजये मुहूर्ते ।
प्रतापशाहश्चतुरङ्गसेनासमन्वितः श्वेतहयं व्यरोहत् ॥ १८ ॥
ताम्बूलसम्पूर्णमुखीं प्रसन्नां लीलाम्बुजं पाणितले दधानाम् ।
तारुण्यपूर्णां स्तनहेमकुम्भामसावपश्यत्पुरतो मृगाक्षीम् ॥ १९ ॥
कुर्वन्नभो भूतलवद्रजोभिर्भुवं नभोवद्गजमेघसङ्घैः ।
प्रतापशाहस्य महारथस्य वरूथिनीनां स रराज भारः ॥ २० ॥
दिल्लीशशालाचलसार्वभौमकुमारयोरश्विसमानभासोः ।
महापुरे धायिटनाम्नि रम्ये तयोरभूद्दर्शनकौतुकश्रीः ॥ २१ ॥
गजैस्तुरङ्गैर्वसनैरनेकैः सुवर्णरत्नाभरणैरुदारैः ।
तौ राजवीरौ मुदितौ नितान्तं मिथः स्म सम्भावयतस्तदानीम् ॥ २२ ॥
ततः परं शाहमुरादभूपः प्रतापशाहं निजगाद वीरम् ।
आर्यः स नारायणसार्वभौमो बिभर्ति कच्चित्कुशली धरित्रीम् ॥ २३ ॥
पुरा मयूराद्रिपतेरमुष्य गुरोः पुरस्तादवसं सशङ्कः ।
महारथं त्वामधुना वयस्यं सम्प्राप्य सम्पूर्णमनोरथोऽस्मि ॥ २४ ॥
बलेन रूपेण च कामकल्पं सहायमासाद्य सखे भवन्तम् ।
मन्येऽधुना दक्षिणदिङ्मृगाक्षीमालिङ्गितामेव करेऽवलम्ब्य ॥ २५ ॥
निशम्य तां शाहमुरादवाचं प्रतापशाहः स्मितपूर्वमाह ।
The Râshtraudha Vans'a Mahâ Kâvya, which is presented to the public as the fifth number of the "Gaekwad's Oriental Series", is a historical poem containing the history of the Bâgulas of Mayûragiri, from the originator of their dynasty Râshtraudha, king of Kanouj to the reign of Nârâyana Shah, ruler of Mayûragiri, and the patron of the author.

The Author of the poem and the date of composition.

The author of the Râshtraudha Kâvya is Rudrakavi, a southerner. He was patronised by King Nârâyana Shah of Mayûragiri and it was under the latter's order that he composed the present work in S'aka 1518 (1596 A. D) Rudra composed another work, called Jahangir Shah Charitra, a prose work divided into Ullâsas, at the order of Pratapa Shah, the son of Nârâyana Shah A fragment of this work discovered at Nasik shows that many verses of the present poem are repeated in that work, e g. (1) जनतापनताप-हारिणोऽस्य रा० VI. 8, ज० III. 18. (2) भीमच्छाटजलदे रा० XI 36, ज० IV 8 (3) निर्वच्छोणितपूरताम्रवपुष रा० XI 39, ज० IV 5 (4) रास्य कीर्त्ति रा० XX. 95, ज० IV. 12.

The name of the author's father was Ananta, while that of his grandfather was Kes'ava. He was patronised by Nârâyana Shah and his son Prâtapa Shah. The present work was composed by the author after hearing the subject matter from Lakshmana Pandita

The summary of the Poem. Once S'iva was playing at dice with Pârvatî on the peaks of Mt. Kailâsa. One of the dice accidently struck the moon in S'iva's crest, and a boy of eleven sprang from the moon. Pleased with his prayer, S'iva granted him the kingship of Kânyakubja. At this time Latanâ who seems to be the tutelary goddess of the kings of Kânyakubja, requested that the boy should be given to her for the throne of Kanouj S'iva granted her request. Vîrabhadra presented him with a sword of victory. Latanâ then took the boy and gave him to the king Nârâyana of Kanouj of the solar race, who was praying God for a son. The

ते सर्वभूपानवधार्य कूपा-
न्कुलावतंसा नरराजहंसाः ।
गुणार्णवश्रीजयसिंहदेव-
पुरीमविन्दन्नमहल्लसंज्ञाम् ॥ ४१ ॥

पुरस्कृतास्ते गुणिनोऽधिजग्मु-
स्तस्याश्रयं प्राप्य गुणातिरेकम् ।
रथ्यागतो हार इवाम्बुजाक्षी-
वक्षोरुहाम्भोजसमाश्रयेण ॥ ४२ ॥

वैदेशिकैस्तैर्जयसिंहदेव-
भूपाश्रयात्प्रापि विशेषतः श्रीः ।
गोविन्दवक्षस्थललम्बनेन
श्रीकौस्तुभेनेव समुद्रजेन ॥ ४३ ॥

प्रौढप्रतापैरखिलैरमीभि-
स्तदाश्रयाद्दिग्वलयं विजिग्ये ।
विवेकसङ्गाद्भवभीतिजालं
धर्मार्थकामैरिव निर्विरामैः ॥ ४४ ॥

स्ववीर्यलब्धं हरिशब्दपूर्वो
हरः स्वतन्त्रं पदमाप्तुकामः ।
श्रीसारणेशं तपसा सिषेवे
विना शिवार्चां नहि राज्यलाभः ॥ ४५ ॥

परमसारणशङ्करपूजनै-
र्बहुतिथे दिवसेऽप्यतिवाहिते ।
अनवलोक्य फलं विधुरोऽकरो-
द्धरिहरोऽरिहरो हरवर्णनम् ॥ ४६ ॥

फणीशांसितनागा नागाजिनपरिधिनोदारासङ्गा ।
सुरनरदनुजालम्बा सान्द्रामर्षिराद्रिमा जयति ॥ ४७ ॥

सादितासुरकदम्बकीर्त्तये
देवदैत्यनरगीतकीर्त्तये ।
कल्पितत्रिभुवनैकपूर्त्तये
मामिका प्रणतिरष्टमूर्त्तये ॥ ४८ ॥

भवभयभञ्जनं जनेशं भसितभुजङ्गमभोगभूषिताङ्गम् ।
सकलभुवनसंभवं भवानीविदितमहाविभवं भवं भजामि ॥४९॥

पातु मां पार्वतीचेतःकुमुदानन्दचन्द्रमाः ।
शङ्करः कोटिमार्त्तण्डप्रचण्डद्युतिमण्डलः ॥ ५० ॥

यत्रेयं भगवति जाग्रति त्रिलोकी
जागर्त्ति स्वपिति विलीयते क्षणेन ।
एकस्मै गततमसे नमोऽस्तु तस्मै
कस्मैचित्त्रिभुवनभूषणाय पुंसे ॥ ५१ ॥

वैकुण्ठे सति कुण्ठे धातरि कातरीभवन्मनसि ।
शक्रे चकितदैवे कवलितगरलः शिवो जयति ॥ ५२ ॥

यत्पौरन्दरमाधिपत्यमतुलं चक्रे स लङ्केश्वर-
स्तन्माहेश्वरलोचनाञ्चलचमत्कारैकलीलायितम् ।
यन्निर्वाणमवाप राघवशरत्राणेन कालीपते-
स्तत्कैलासनिवासकम्पकुपितभ्रूक्षेपविक्षोभितम् ॥ ५३ ॥

मनसा वचसा च कर्मणा वा
भवतो नान्यदुपास्यदैवतं मे ।
इह विश्वमनस्सरोजहंसो
भगवानेव महेश्वरः प्रणम्यः ॥ ५४ ॥

इति नुतिवचनप्रसन्नगौरी-
परिवृढपादसरोरुहप्रणीतम् ।
हरिहरधरणीपतिः सुराज्यं
चिरतरमिन्दिरभूधरे चकार ॥ ५५ ॥

श्रीमद्बागुलभूमिपालतिलकश्रीशाहनारायण-
स्फूर्जत्कीर्त्तिपवित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।
भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्ये शम्भुवरप्रदानललितः सर्गो द्वितीयोऽगमत् ॥ ५६ ॥

इति श्रीमदखिलभूपालमौलिशालिमाणिक्यमालामरीचिवीचिसमर्चितचरणसरोजमयूर-गिरिकेसरिश्रीनारायणशाहमहाराजोत्तेजितदाक्षिणात्यरुद्रकवीन्द्रविरचिते राष्ट्रौढवंशे महाकाव्ये महेश्वरवरप्रदानो नाम द्वितीयः सर्गः ॥

तृतीयः सर्गः ।

ततो यशस्वी नृपसोहडस्य
द्वौ भ्रातरौ जग्मतुरग्रजस्य ।
श्रीकन्यकुब्जानगरेश्वरस्य
पादारविन्दार्चनसाभिलाषौ ॥ १ ॥

श्रीजाखराजक्षितिनायकस्य
पादारविन्दं शिरसाऽभिवन्द्य ।
भूयोऽपि राष्ट्रौढकुलाद्रिसिंहो
दिक्चक्रवालं ययतुर्विजेतुम् ॥ २ ॥

दस्यूनसुद्रान्पथिलंद्भद्रा-
नापीवनीतोरणमालवासान् ।
निहत्य तं धाऽथ विजित्य देशं
द्विजाग्रहारं कृतवान्स्म सारम् ॥ ३ ॥

जटीश्वरानुग्रहवृद्धतेजाः
श्रीसोहडो नाम महीमहेन्द्रः ।
राष्ट्रप्रदामिष्टिमियाज यज्वा
शालिक्यप्रदेशीकृतभूरिविप्रः ॥ ४ ॥

---

१ may be [illegible]

तस्मादकस्मान्निरियाय धन्या-
पुण्येति देवीद्वयमग्निकुण्डात् ।
राजानमाहेति भवानजय्यः
सङ्ग्रामरङ्गे भविता रिपूणाम् ॥ ५ ॥

स्वदेवताभिः सह नूनमावां
सिते त्वमम्बे परिपूजयस्व ।
अतः परं त्वत्कुलवागुलानां
भविष्यतीदं बिरुदं सिताम्बम् ॥ ६ ॥

ताभ्यामिति प्राप्तवरो नरेन्द्रो
जेतुं ययौ दक्षिणदिक्प्रदेशम् ।
स पिप्पलग्राममवाप्य तत्र
व्यनीनशन्नाहलमण्डलानि ॥ ७ ॥

ततः समुत्थाय विधाय माटी(?)-
माटीकमानः किल वारिसङ्घम् ।
लोकानशेषानपबाधमाना-
स्तमारयत्पञ्च शतं स भिल्लान् ॥ ८ ॥

स वारिमद्ग्राममवेक्ष्य रम्य-
मानन्दमाविन्दत भूमिपालः ।
तां राजधानीमदधात्तदानी-
मतिष्ठिपत्तत्र नृपासनं च ॥ ९ ॥

श्रीसिंहनामप्रभवो यशस्वा-
न्स रामदेवस्य सुतां विवाह्य ।
दुर्गान्तरे देवगिरौ निषण्णो
[illegible] पत्नीं [illegible]ाख्याम् ॥ १० ॥

तस्मादथासीद्भुजमल्लदेवो
विजित्वरो गुर्जरमालवानाम् ।
अल्लावदीनं यवनाधिनाथं
निहत्य यस्तस्य महीं जहार ॥ ११ ॥
तस्मादभून्माल्लुगि नाम भूपः
सङ्ग्रामविद्रावितवैरिभूपः ।
रणेऽजयद्यो नवलक्षसङ्ख्य-
धनुर्द्धराधीश्वररामराजम् ॥ १२ ॥
हेमाद्रिनाम्नः सचिवोत्तमस्य
प्रणामपूर्वप्रचुरार्थनाभिः ।
श्रीमाल्लुगिर्देवगिरीशरामं
सामन्तमाधाय पुनर्मुमोच ॥ १३ ॥
पाणिग्रहं कीर्त्तिमृगेक्षणायाः
सङ्ग्रामकेलीभवने विधाय ।
विनिर्जितलाटदशराजचक्रो
सहस्रधामेव रराज राजा ॥ १४ ॥
दिवं गते माल्लुगिभूमिपाले
तदीयसूनुः किल पेयिदेवः ।
दिक्सुन्दरीभूषणकीर्त्तिशाली
सिंहासनं पित्र्यमलञ्चकार ॥ १५ ॥
यो लङ्किवंशप्रभवं नवीन-
साहस्रदेशेश्वरमाहवेषु ।
विजित्य वीरेश्वरमागिदेवं
महापुरीं भारुलीमभाक्षीत् ॥ १६ ॥
तस्मादभूद्भूपतिनान्नदेवः
सुवर्णपूर्णीकृतभूमिदेवः ।
प्रतीपवीरानवजित्य युद्धे
यः पत्तनं जैत्रपुरं चकार ॥ १७ ॥

विजित्य यो गोपपतिं महेशं
जग्राह शालागिरिमुच्चशालम् ।
यन्मूर्ध्नि दीपेन सुरा निशीथे
तमिस्रपक्षेऽपि सुखेन यान्ति ॥ १८ ॥

कल्पद्रुमाणां नवपल्लवानि
स्फुरत्प्रसूनानि च कौतुकार्थम् ।
रामा यमारुह्य मनोभिरामाः
करेण चिन्वन्त्यपरिश्रमेण ॥ १९ ॥

यस्यान्तिके सञ्चरदिन्दुबिम्बं
समुल्लसन्मन्दिरहंसबुध्या ।
पुनः पुनः स्मेरमुखाः कुमाराः
करारविन्देन परिस्पृशन्ति ॥ २० ॥

यन्मेखलालम्बिबलाहकौघे
तडिल्लताविभ्रममुद्वहन्तीम् ।
पत्युः समीपेऽपि विराजमानां
सपत्ननारीं न विवेद बाला ॥ २१ ॥

यस्मिन्नगेशे नयनाञ्चलेषु
निधाय कालाञ्जनमङ्गनाभिः ।
सुधाकरे यन्निरमार्जि पाणिः
स कालिमाऽद्यापि सुधांशुबिम्बे ॥ २२ ॥

यस्येन्द्रनीलावलिशालिशृङ्ग-
मुत्तुङ्गमाचुम्बति भानुबिम्बे ।
गाढ़परागभ्रमतो द्विजेन्द्राः
स्नानादिकर्म द्रुतमाचरन्ति ॥ २३ ॥

यस्मिन्मृगाक्ष्यो मुखसाम्यदर्शी-
[illegible] क्षणदाधिमिन्दुम् ।
कर्त्तुं छिदन्ति श्रवणावतंस-
[illegible] चन्द्रस्फुटदर्पणं ॥ २४ ॥

तारामणीन्दूर्जयतेऽपि दातुं
प्रतिक्षणं प्रासवतेऽपि यत्र ।
नार्यो मृगाङ्काय मुखारविन्द-
विलासमद्यापि न शिक्षयन्ति ॥ २५ ॥
यो वेधसा कौतुकिना हिमाद्रि-
विन्ध्याद्रिहेमाचलमन्दरेभ्यः ।
साराणि वस्तून्युपनीय चक्रे
लङ्केशशैलादपि दुर्विलङ्घ्यः ॥ २६ ॥
आस्थाय शालागिरिमीदृशं तं
चिरान्मयूराचलमग्रहीत्सः ।
ततो जगच्छायनृपं क्रमेण
विजित्य जग्राह पिशोलशैलम् ॥ २७ ॥
जित्वा नृपेभ्यो वसु नानदेवः
श्रीयज्ञखेटे मखमाततान ।
अध्वर्यवे गौतमगोत्रजाय
तद्दक्षिणं चादित यज्ञखेटम् ॥ २८ ॥
आभीरभूपालकुलैकसिंहं
पराक्रमोत्सारितवीरसिंहम् ।
महीपतिर्मुक्तमुकुन्दसेवं
जिगाय जन्ये जगरीक[illegible] ॥ २९ ॥
ततः कदाचित्स मु[illegible]
जैत्राख्यया वल्लभया [illegible]
द्विजाग्रहारादि[illegible]
सम्प्रार्थितो जैत्र[illegible] ॥ ३० ॥
सा तत्र जैत्रा[illegible]
धरासुरेभ्यो [illegible]
तुरङ्गमानङ्कु[illegible]
निकेतनक्षेत्र[illegible] ॥ ३१ ॥

पुराणि सा षोडश वेदविद्भ्यो
महीसुरेभ्यः प्रददौ यथावत् ।
परश्शतारामतडागवापी-
कूपादि भूपालवधूस्ततान ॥ ३२ ॥
इत्थं नृपे धर्मवधूसहाये
तस्मिंश्चिरात्कुर्वति धर्मराज्यम् ।
अत्रान्तरे कोटितुरुष्कसैन्यै-
र्दिल्लीश्वरः शालगिरिं रुरोध ॥ ३३ ॥
कर्णाटलाटोत्कलचोलगौड-
कलिङ्गवङ्गादिसमस्तदेशान् ।
विजित्य यो रामगिरेरधीशं
श्रीरामराम(जं) समरे जघान ॥ ३४ ॥
भूपालदिल्लीश्वरयोस्तदानीं
संवत्सरं घोरतरो रणोऽभूत् ।
दिल्लीपतेः सैन्यबलं विशालं
श्रीनानदेवस्य तु दुर्गमेव ॥ ३५ ॥
ते नानदेवं शतसप्तवीराः
सर्वैरुपायैः समरेषु जघ्नुः ।
दिवं गते तत्र तदीयसूनु-
रध्यास्त सिंहासनमेकदेवः ॥ ३६ ॥
रणेषु हत्वा यवनानशेषान्
भीमात्मजं विज्झलदेवराजम् ।
जित्वा च शालागिरिवर्त्तमानो
निष्कण्टकं राज्यमसौ चकार ॥ ३७ ॥
ततस्तदीयस्तनयो बुभोज
भूपीठमावारिधि खङ्गसेनः ।
गुरुं पुरस्कृत्य सखैरनेकै-
र्योविष्णुमीजे पशुबन्धमुख्यैः ॥ ३८ ॥

स मल्लिकाख्यं यवनाधिनाथं
जित्वाष्टसाहस्रमुगूलवीरान् ।
हत्वा ललिङ्गाचलमस्य नाथं
धृत्वा ददौ बन्दिकृते सभूपम् ॥ ३९ ॥
वेटाभिधाने नगरे कठोरै-
रावेष्टितो यो यवनेन्द्रवीरैः ।
समेत्य सद्यः परिभूय सर्वा-
नमूमुचद्वल्लवरामराजौ ॥ ४० ॥
तस्मादभूद्वागुलवंशहीरः
श्रीरामनामा रणरङ्गधीरः ।
पयोधिमध्यस्थगिरौ निगढं
जघान योऽसौ कमलक्षितीशम् ॥ ४१ ॥
तदीयसूनुः किल वीरसेनः
सिंहासनं पैतृकमाससाद ।
यो यावने लोहपुरे समन्ता-
दकालहोलोत्सवमाततान ॥ ४२ ॥
दिवं गतेऽस्मिन्सति तत्किशोरे
सिंहासनाध्यासिनि जोपिदेवे ।
तदाऽग्निराड्भैरवनागवत्या-
स्तद्धर्मराज्यं शिथिलाङ्गमासीत् ॥ ४३ ॥
राष्ट्रं समन्तादभिवर्त्तमान-
महीभुतामामिषभावमाप ।
अमात्यधाने सति नाम चित्ते
नाक्रम्यते किं परैरेव गृध्रैः ॥ ४४ ॥
दिनकरकुलहीरवीरसेन-
क्षितिपतिशो[illegible]मेदिनी [illegible]
[illegible]
[illegible]

तत्र कोऽपि कलहः प्रकृतीनां
सारवस्तुहरणाय बभूव ।
वर्त्मनीव पतितामिषपेशी-
भक्षणाय सरमातनयानाम् ॥ ४६ ॥

केचित्तत्र गिरीन्द्रदुर्गमपरे कोशं तुरङ्गान्परे
निन्युः केऽपि मदान्धकुञ्जरकुलं वाराङ्गनाः केचन ।
इत्थं लुण्ठनघोरणीं क्षितिभुजामालोक्य पादचरै-
र्मार्गोऽसौ दिवसेऽपि दुर्गमनरः कष्टं तदानीमभूत् ॥ ४७ ॥

इत्थं वीक्ष्य प्रकृतिपुरुषाः केऽपि निर्विण्णचित्ताः
'सैषा शालागिरिनरपतेरुत्तमा राज्यलक्ष्मीः ।
माभूद्वैरिक्षितिपनिकरालम्बिनीति प्रशस्तं
ज्ञात्वा जग्मुः प्रथमनृपतेः सोदरं नानदेवम् ॥ ४८ ॥

तं मन्त्रिप्रकरमवेक्ष्य नानदेवः
साम्राज्यं त्वधिगतकल्पमेव मेने ।
तद्युक्तं विधिरपि कोविदः क्रियाणां
प्रारम्भं घटयति भाविकानुकूलम् ॥ ४९ ॥

श्रीमद्बागुलभूमिपालतिलकश्रीशाहनारायण-
स्फूर्जत्कीर्त्तिचरित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।
भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्ये प्राकृतमण्डलोत्थकलहः सर्गस्तृतीयोऽगमत् ॥ ५० ॥

॥ इति श्रीमदखिलभूपालमौलिशालिमाणिक्यमालामरीचिवीचिसमर्चितचरण-
सरोजमयूरगिरिकेसरिश्रीनारायणशाहमहाराजोद्योजितदाक्षिणात्यरुद्र-
कवीन्द्रविरचिते राष्ट्रौढवंशे महाकाव्ये शालागिरिमयूरगिरिप्र-
हणप्रकृतिकलहो नाम तृतीयः सर्गः ॥

Published by Janardan Sakharam Kudalkar, M. A., LL B, Curator of State Libraries, Baroda, for the Baroda Government, and Printed by Ramchandra Yesu Shedge, at the 'Nirnaya Sâgara' Press, 23, Kolbhat Lane, Bombay

Price Rs. 1-12-0.

चतुर्थः सर्गः ।

सोदरस्थविरमन्त्रिसत्क्रियां
संविधाय नयकोविदस्ततः ।
नानदेवनृपतिः सभागृहं
शिश्रिये सचिवबन्धुभिः समम् ॥ १ ॥

गम्यतामिह मया न वेति नान्
पृच्छति क्षितिपतौ विचक्षणे ।
एक आह सचिवो जरत्तरः
पश्यतां सकलमन्त्रिणां पुरः ॥ २ ॥

आर्य कार्यजलधौ मनीषिणो
मन्त्ररूपतरणिं विनन्वते ।
सर्वकर्मणि विपद्विपश्चिना
कार्यसिद्धिरिह पाक्षिकी न [illegible] ॥ ३ ॥

राज्यदानविषये महीन्द्र [illegible]
र्मार्ग एव वहनाय वा [illegible]
त्वां नयन्ति किमितः [illegible]
मन्त्रिणां दुरवबो [illegible]

मन्त्रिणः किमु [illegible]
त्पत्सहोदरन [illegible]
प्रेपिता इह [illegible]
किं स्वयं नु [illegible]

श्रूयते [illegible]
म्लेच्छनृप [illegible]
[illegible]
[illegible]

इत्युदीर्य वचनं मुनिव्रते
तत्र मन्त्रिणि शिरः प्रकम्पयन् ।
कोऽपि वृद्धसचिवो महीपतिं
वक्तुमित्थमुपचक्रमे वचः ॥ ७ ॥
देव पाक्षिकविपत्तिशङ्कया
न क्रियेत यदि काचन क्रिया ।
लोक एष तदजीर्णशङ्कया
भोजनेऽपि न कदा प्रवर्त्तताम् ॥ ८ ॥
वंशजामुपगतामपि श्रियं
कामिनीमिव गुणैकलालसाम् ।
स्वामुपेक्ष्य कुरुतेऽन्यगामिनीं
यस्तदीयमयशो विचारय ॥ ९ ॥
भूपते दलपतेरुपाश्रया-
त्सौवदुर्गनिचये वशीकृते ।
म्लेच्छभूमिपतिभिस्तदा कथं
हन्त वागुलगतिं विचारय ॥ १० ॥
भूतिभङ्गकमपास्य संशयं
गन्तुमत्र कुरु तूर्णमुद्यमम् ।
तन्निहत्य कुलराज्यघातकान्
बन्धुसूनुमभिषिञ्च तत्पदे ॥ ११ ॥
बालनायकतया भिदां गतं
वीक्ष्य राष्ट्रमधिपस्य मन्त्रिणः ।
त्वां प्रगल्भनृपमन्वयोद्भवं
संविहाय शरणं व्रजन्तु कम् ॥ १२ ॥
इत्थमस्य वचनामृतं हितं
नीतिरीतिचतुरं मनोहरम् ।
सर्वसभ्यजननाभिनंदितं
मेदिनीपतिरुरीचकार तत् ॥ १३ ॥

अन्यदुर्गविजयाय पार्थिवे
प्रस्थिते द्रुतमदुद्रुवन्नृपाः ।
तावदेव वनचारिणो मृगा
नैव यावदुपयाति केसरी ॥ २८ ॥

भो-
राज्यमेतदखिलं तवैव
स्तन्निमित्तमयमुद्यमो मुधा ।
रक्ष रक्ष शरणागतानिति
प्रोचुरेनमिति केऽपि भूभृतः ॥ २९ ॥

कोशजातमखिलं चिरार्जितं
संविधाय नृपतेरुपायनम् ।
अद्य नस्त्वमिह सौवसेवकान्
स्थापयेति कतिचित्तमूचिरे ॥ ३० ॥

यावनक्षतजपूरवाहिनीं
सम्प्रतीर्य भुजवीर्यनौकया ।
अभ्रचुम्बिशिखरं नृपः क्षणा-
दग्रहीदथ मयूरभूधरम् ॥ ३१ ॥

चामराचलपिशोलपर्वतौ
नानदेवनृपतिर्गृहीतवान् ।
कीर्त्तिदूतिवचसा वशीभव-
न्मेदिनीप्रणयिनीकुचाविव ॥ ३२ ॥

स्तम्भाभिधानगुरुदेवरमालशैलौ
दोर्दण्डखण्डितविपक्षबलो गृहीत्वा ।
अन्यानपि प्रचुरदुर्गमदुर्गशैलान्
जग्राह विग्रहपरिग्रहबद्धकक्षः ॥ ३३ ॥

गोदावरीतटभुवं समुपेत्य धीरः
पाणिग्रहं मधुरशालिसरोरुहाक्ष्याः ।
दृप्यत्तुरुष्कधरणीपतिवीरघोर-
संख्यसंगरमहे पटहाञ्चकार ॥ ३४ ॥

प्रातराह्निकयथोचितक्रियः
प्राप्तभूषणविधिः सदो गतः ।
भूपतिर्द्विजगणाय सादरं
रात्रिवृत्तमखिलं न्यवेदयत् ॥ २१ ॥
पार्थिवं निजगदुर्विपश्चित-
स्तन्निमित्तमवधार्य मङ्गलम् ।
मन्महेऽद्य भविता भवानहो
सर्वभूमिपतिमण्डलेश्वरः ॥ २२ ॥
दैवविद्भिरवनीसुपर्वभिः
सन्निवेदितशुभग्रहोदये ।
राज्ययोगिसमये प्रतापवा-
नारुरोह नृपतिस्तुरङ्गमम् ॥ २३ ॥
स व्रजन्प्रथमतः सुवासिनीं
वीक्ष्य गामथ पुरः सतर्णकाम् ।
दक्षिणानथ मृगानसाववै-
न्मेदिनीं करतलाग्रवर्त्तिनीम् ॥ २४ ॥
यावदेति स गिरेरुपत्यकां
तावदस्य नृपतेरधित्यकाम् ।
सैनिकैः समधिरुह्य वैरिण-
स्तान्निगृह्य जगृहे महीधरः ॥ २५ ॥
शालशैलमधिगम्य दुर्गमं
दुष्टनिग्रहविधानकोविदः ।
प्राड्विवाकमतमास्थितोऽवनि
नानदेवनृपतिः शशास ताम् ॥ २६ ॥
राज्यकारिणि चिराय सादरे
नानदेवधरणीपुरन्दरे ।
येऽन्यपर्वतनिवासिनः परं
तेऽपि दाह्निनभयाश्चकम्पिरे ॥ २७ ॥

साहाय्यमाधाय स मालवानां
भर्तुर्जिगीषोः किल मण्डपाद्रिम् ।
जित्वा ततो दक्षिणभूमिपालं
द्राक् वैदुरीं नाम पुरीमलुण्ठत् ॥ ३५ ॥

अथ सपदि महेन्द्रराजधानी-
ललितमनन्तपुरं समेत्य भूपः ।
सममदित समस्तदानजातं
कनकतुलापुरुषादिकं द्विजेभ्यः ॥ ३६ ॥

राष्ट्रं ब्रह्ममयं चकार सकलानानीय यद्ब्राह्मणा-
न्शब्दब्रह्म यदध्यजीगपदथो नैश्चिन्त्यमाधाय तान् ।
यन्नित्यं जनकेश्वरादपि परब्रह्मैकनिष्ठो भव-
न्नानब्रह्मतया प्रसिद्धिमगमद्ब्रह्माण्डभाण्डे ततः ॥ ३७ ॥

अधिगतवति भूमीकार्मुके तत्र जैत्रा-
नगरमधि पुराणं पित्र्यसिंहासनं तत् ।
अथ परमममन्दानन्दसन्दोहपूर्णाः
कथितमनुबभूवुर्नागरा रामराज्यम् ॥ ३८ ॥

श्रीमद्बागुलभूमिपालतिलकश्रीशाहनारायण-
स्फूर्जत्कीर्त्तिचरित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।
भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्येऽस्मिन्विजयाभिषेकरसिकः सर्गस्तुरीयो ययौ ॥ ३९ ॥

इति श्रीमदखिलभूपालमौलिमाणिक्यमालामरीचिवीचिसमर्चितचरणसरोजश्रीमयूर-
गिरिकेसरिश्रीनारायणशाहमहाराजोद्योजितदाक्षिणात्यरुद्रकवीन्द्रविरचिते
राष्ट्रौढवंशे महाकाव्ये राज्याभिषेको नाम चतुर्थः सर्गः ॥

पञ्चमः सर्गः ।

नानदेवनृपतेरथ सूनुः शोभया विजितमाधवसूनुः ।
तीर्थसार्थविनियोजितयूपः क्ष्मां जुगोप किल भैरवभूपः ॥१॥

तेन कल्पतरुरीप्सितदानैः सम्पदा च सुरनायकलक्ष्मीः ।
विद्विषोऽपि सकला भुजसारैः सूर्यवंशतिलकेन विजिग्ये ॥२॥

अर्थिचातकघनः कुलवाटीचन्दनो रिपुभुजङ्गसुपर्णः ।
यश्च वो००लकडिण्डिममुख्यानेकसत्कविपिकालिरसालः ॥३॥

कामिनीनयनपालिचकोरीचन्द्रमाश्चतुरवीरधुरीणः ।
यश्च गुर्ज्जरमहीपुरुहूतप्रेषितोल्लसदुपायनशाली ॥ ४ ॥

मेदिनीवलयपालनशीलो डोमराज इति तत्तनयोऽभूत् ।
यः सपत्नजनकुञ्जरसिंहः शिश्रिये गिरिधुरीणमयूरम् ॥ ५ ॥

यत्प्रतापतपनो रिपुनारीनेत्रनीरतटिनीं विततान ।
यद्यशोहिमकरोऽखिलविद्वद्दुःखसागरहरोऽद्भुतमेतत् ॥ ६ ॥

स्फुरद्दर्पकन्दर्पदर्पघ्नमूर्त्ति-
र्महीमण्डलीमण्डनीभूतकीर्त्तिः ।
महादेवपादारविन्दानुरक्तो
महादेवनामा तदीयः सुतोऽभूत् ॥ ७ ॥

यदीयं गुणग्राममानन्दकन्दं
सहस्राननैरप्यशक्तः प्रवक्तुम् ।
धरालम्बदम्भेन पातालमूले
भुजङ्गाधिपो लज्जया निर्ममज्ज ॥ ८ ॥

धरित्री पवित्रीकृता यच्चरित्रै-
र्दिशां वृन्दमाशोभितं यद्यशोभिः ।
यदीयप्रतापप्रतप्तः पतङ्गः
पयोधिं यत प्रत्यहं मङ्क्तुमेति ॥ ९ ॥

[illegible] तुङ्गाग्रै-
[illegible]र्भाजिभिः ।
स्फुरच्चामरैर्वाजिभिः [illegible]
सदा [illegible] सिंहासनं नः ॥ १० ॥
नमन्मन्त्रिणी [illegible]
स्फुर[illegible]नाजिनागः ।
भगाङ्के[illegible]निचितानणो नः
प्रतीपक्षितीशान[illegible]न् ॥ ११ ॥
महादेवपादारविन्दप्रसादे
तुरङ्गद्विपेन्द्रादिसेनाप्रकर्षे ।
परप्रेयसीवर्जने सत्यवादे
प्रजापालने तादृशः कोऽपि नाभूत् ॥ १२ ॥

एतस्य क्षितिपालधोरणिमणेरालोक्य भक्तिं परां
कैलासाचलसाम्यमस्य च गिरेः सम्पूर्णमापादितुम् ।
देवः शैलसुताविनायकगणैः सार्द्धं मयूराचले
नित्यं वस्तुमुपाययौ स भगवान्गोकर्णपल्लीश्वरः ॥ १३ ॥

श्रीमान्मयूरगिरिमूर्द्धनि निर्विरामं
कृत्वा शिवालयमतीव मनोभिरामम् ।
तस्मिन्विधाय विधिवच्च शिवप्रतिष्ठां
तुष्टाव भक्तिभरकण्टकिताङ्गयष्टिः ॥ १४ ॥

निस्सङ्गोऽपि नगाधिराजतनयादेहार्द्धधारी सदा
निश्चेष्टोऽपि चराचरं विरचयन्निस्स्वोऽपि विश्वम्भरः ।
निष्कामोऽपि समस्तकामनिलयः शान्तोऽपि विश्वान्तकः
सर्वेशोऽपि दिगम्बरो विजयते चन्द्रार्द्धचूडामणिः ॥ १५ ॥

कालान्तकाय कलिकल्मषनाशनाय
ब्रह्मादिदेवनुतपादसरोरुहाय ।
विश्वेश्वराय भवसागरतारकाय
भूघ्राण(?)मध्यनिलयाय नमः शिवाय ॥ १६ ॥

हिमकरखण्डकिरीटं सुरतरङ्गिणीमिलज्जटाजूटम् ।
वामाङ्गीभवदचलं वन्देऽहं तं परं ब्रह्म ॥ १७ ॥

उन्मीलन्नवयौवनाः सुवदनाः सानन्दमालिङ्गिताः
सर्वे स्वादुकषायतिक्तमधुरप्रायाश्च भुक्ता रसाः ।
नानागीतविनोदवाद्यविभवैः कालः कियान् ह्रापितः
चेतः क्वापि न हि प्रसन्नमधुना विश्राम्यति श्रीशिवे ॥ १८ ॥

भवसागरस्य परमं तरणं करणं सुखस्य विपदां हरणम् ।
वरणं विमुक्तिसुदृशः शरणं चरणं हरस्य करवाणि चिरम् ॥ १९ ॥

मानसे मुनिजनेन गोपितं द्वीपिचर्मपरिधानशोभितम् ।
योगिनीमधुरगीतिमोदितं सन्ततं नमत नीललोहितम् ॥ २० ॥

शम्भवाय च मयोभवाय ते शङ्कराय च मयस्कराय ते ।
श्रीशिवाय सकलार्थदाय ते सर्वदा शिवतराय ते नमः ॥ २१ ॥

नमनीयपदाम्बुजं सुरैः कमनीयं हिमशैलकन्यया ।
भजनीयमनन्यचेतसा मननीयं मुनिभिः शिवं भजे ॥ २२ ॥

अपि स्नानाज्ज्ञानाविधतनुभृतां यत्त्रिपथगा
विधत्ते कैवल्यं करकमललीलामलकवत् ।
प्रवाहैस्तत्सङ्गैस्त्रिभुवनमिदं पावयति य-
त्प्रभावः सोऽयं श्रीशिव तव जटासंश्रयभवः ॥ २३ ॥

बाले लीलाविलासैरलमलिकुल ते मञ्जुगुञ्जारवैः किं
किं वा कोलाहलैस्ते पिककुल विकलैः केकिनः किं निनादैः ।
रे रे कन्दर्प दर्पं परिहर भवतां सङ्गखेदादिदानीं
सानन्दं मानसं मे पुरहरचरणाम्भोरुहध्यानमग्नम् ॥ २४ ॥

कर्णोत्तंसभुजङ्गमस्तकमणिस्फूर्जत्कपोलस्थलं
कल्याणैकनिदानमाननजितप्रोत्फुल्लपङ्केरुहम् ।
खेलद्बालकबाहुलेयललितक्रीडाभिरानन्दितं
साम्बं धाम किशोरचन्द्रकलिकाचूडालमीडामहे ॥ २५ ॥

श्रीमद्वागुलभूमिपालतिलकश्रीशाह्नारायण-
स्फूर्जत्कीर्त्तिचरित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।
भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्येऽस्मिन्नयमात्मजोत्सवविधिः सर्गोऽगमत्पञ्चमः ॥ ४१ ॥

॥ इति श्रीमदखिलभूपालमौलिमाणिक्यमालामरीचिवीचिसमर्चितचरणसरोज-
मयूरगिरिकेसरिश्रीमहाराजनारायणशाहोद्योजितरुद्रकवीन्द्रविरचिते
राष्ट्रौढवंशे महाकाव्ये भैरवसेनोत्पत्तिर्नाम पञ्चमः सर्गः ॥

षष्ठस्सर्गः ।

जनमानसरञ्जनप्रवीणः पृथिवीनायकधोरणीधुरीणः ।
वसुधामथ शास्त्रशस्त्रविद्याचतुरो भैरवभूपतिः शशास ॥ १ ॥
यदसाववसन्मयूरशैले नयरीत्या न विपक्षभूपभीत्या ।
न हि हिंस्रभिया मृगाधिराजो गिरिराजस्य दरीं वरीभरीति ॥२॥
गुणिनं तमवाप्य भूमिपालं प्रकृतीनामथ मण्डलं विरेजे ।
स्फुरदुज्ज्वलधाम मध्यरत्नं परमोच्चैरिव हारमौक्तिकानि(नाम्) ॥३॥
दिननायकवंशमौलिरत्ने धरणीं शासति भैरवेऽसपत्ने ।
निजधर्ममवर्णयन्त वर्णा नयविद्याविनयादिकोपपन्नाः ॥ ४ ॥
सकलानपहाय भूमिपालान्निजमौलेरुपरि प्रतिष्ठमाने ।
स चकार परं सितातपत्रे क्षितिजम्भारिरखण्डहेमदण्डम् ॥ ५ ॥
अपि दैवलिपेः प्रतिश्रुतादप्यधिकं यच्छति सर्वयाचकेभ्यः ।
रमणीयसुवर्णशृङ्खलाभूत्परमं भैरवभूपपाणिपद्मे ॥ ६ ॥
कलधौतभरेण भूमिदेवप्रमुखाष्टादशजातयो विनम्राः ।
विहिता इति तस्य दण्डनीतिः श्रवणायैव न तु प्रयोजनाय ॥७॥
जनताघनतापहारिणोऽस्य क्षितिपालस्य गुणौघकीर्त्तनेन ।
गुरुहर्षजुषां परं प्रजानां नयनालीषु बभूव बाष्पपाली ॥ ८ ॥

रिपुकालसुलेमशाहभूमीपतिभीत्या चतुरङ्गसैन्ययुक्तः ।
अथ मण्डपपर्वताधिनाथः शरणं भैरवभूपमाजगाम ॥ ९ ॥
स विजित्य सुलेमशाहवीरं रणधीरं निजदोर्बलप्रतापैः ।
चिरमाश्रयमाश्रितानुरक्तः प्रददौ मण्डपपर्वतेश्वराय ॥ १० ॥
परिपालयति प्रजाः क्षितीशे निजवंशोचितधर्मसम्भ्रमेण ।
अथ गुर्जरदेशपात्रिशाहः शमनीयां ककुभं ग्रहीतुमागात् ॥ ११ ॥
मदगन्धिसहस्रवारणानामपि लक्षद्वयवाजिनामधीशः ।
सुलतानबहादुरः सहायं विनयाद्भैरवराजमाजुहाव ॥ १२ ॥
सकलप्रकृतिप्रधानमुख्यान्गुरुमाहूय च भैरवक्षितीन्द्रः ।
किमु नाम विधीयतामिदानीमिति पप्रच्छ विचार्य कार्यकारी ॥१३॥
अधिगत्य सभासदां विचारं सचिवेन स्थविरेण सम्बभाषे ।
सकलं भवता न बुध्यते किं तदपीयं गुरुगौरवाय पृच्छा ॥ १४ ॥
असुभिर्वसुभिश्च पालनीया कमनीया नवकीर्त्तिरेव भूपैः ।
भवताऽस्य सहायकर्म तस्मादिदमङ्गीक्रियतामिदं मतन्नः ॥ १५ ॥
इति वाचमवाप्य तस्य राजा धुरमुर्व्याः सचिवेषु सन्निधाय ।
चतुरङ्गबलान्वितस्तुरङ्गं सितमारुह्य बहादुरं प्रतस्थे ॥ १६ ॥
तमुपागतमादरान्नरेन्द्रं त्वरितो हर्षभरेण गुर्जरेशः ।
अशनैर्वसनैर्गजैस्तुरङ्गैर्मणिहेमाभरणैरुपाचचार ॥ १७ ॥
अथ भैरवभूपतिं रतीशद्युतिमासाद्य बहादुरः सहायम् ।
अभिरामनिजामशाहलक्ष्मीकमलाक्षीकरपीडनोद्यतोऽभूत् ॥१८॥
अमुना विभुना विरोचमानं बलमादाय चतुर्विधं विशालम् ।
त्वरया परया स गुर्जराणामधिपो देवगिरिं जगाम जेतुम् ॥१९॥
विजयाय समागतं निशम्य प्रतिभूपालबलं निजामशाहः ।
अथ देवगिरेः स्ववाहिनीभिः समसुत्तीर्य समाजगाम योद्धुम् ॥२०॥
यवनाधिपतिर्विलोक्य सेनां परमेनां प्रतिभूपतेर्बिभाय ।
किमु वन्यगजा भवन्ति शूरा मृगराजे गहनं विगाहमाने ॥२१॥
समरस्तुमुलो भयङ्करोऽभूदुभयोः सङ्गतसेनयोस्तदानीम् ।
कलहो दिवि देवसुन्दरीणामपि वीरप्रवरान्वरीतुमासीत् ॥ २२ ॥

सप्तमस्सर्गः ।

अथ कोऽपि बुधोऽनवद्यविद्यारमणीयो गरुडोपनामधारी ।
कलिकर्णममुं निशम्य काशीनगराद्भैरवराजमाजगाम ॥ १ ॥
तमुपागतमादरातिरेकादथ दौवारिकवेदितो विधिज्ञः ।
स्फुरदर्घ्यसुवर्णपात्रपाणिः क्षितिपालोऽभिजगाम जातहर्षः ॥ २ ॥
उचितोच्चतराभिरर्चनाभिः प्रमदोत्फुल्लविलोचनो नरेन्द्रः ।
मणिकाञ्चनविष्टरे निविष्टं परमानर्च मनीषिणां वरिष्ठम् ॥ ३ ॥
विदिताखिलसाङ्गसार्थवेदः परमातिथ्यविनीतमार्गखेदः ।
विहिताञ्जलिना स भूमिदेवो जगदे भैरवभूभुजा तदेदम् ॥ ४ ॥
अपि पण्डितरत्नपावनी सा रजनीजानिकिरीटराजधानी ।
कुशला वरिवर्त्ति यत्प्रसादात्पदवी नैव दवीयसी पुरारेः ॥ ५ ॥
भवतश्चरणारविन्दपूजां कुरुतामेष मनोरथेन केन ।
अथवाऽत्र भवत्समागमोऽयं मम पूर्वार्जितपुण्यपाकहेतुः ॥ ६ ॥
इति तस्य निशम्य गामुदारामनुकूलां मुदितो जगाद विद्वान् ।
विनयार्णव भूपते तवास्मादवलोकादपरो मनोरथः कः ॥ ७ ॥
जगतीवलये नृपो भवादृङ्विशुद्धः क्वचिदीक्षितश्श्रुतो वा ।
भवतः प्रतिगृह्य हेम तस्मादिह सोमेन नृसोम यष्टुमीहे ॥ ८ ॥
इतिवाचममुष्य पण्डितस्य स्फुटमाकर्ण्य महीपतिः प्रसन्नः ।
उपनीय सुवर्णटङ्कभारान्कनकस्नानमचीकरद्द्विजस्य ॥ ९ ॥
गरुडाय सुवर्णदानमेतत्किमपूर्वं भवतीति सम्प्रधार्य ।
पुनरस्वरसादनर्घ्यरत्नप्रकरं चापि तुरङ्गमानदासीत् ॥ १० ॥
शिखिभूधरवासिनो जनस्य स्तवनीयौ नितरामुभावभूताम् ।
अधिकाधिगमे गतस्पृहोऽर्थी क्षितिपालोऽपि बलेन भूरिदायी ॥ ११
गरुडोऽथ तथा चकार यागं सकला येन दिवौकसो हविर्भिः ।
अनिवारितमन्नहेमदानैः क्षितिदेवा अपि भूरितृप्तिमीयुः ॥ १२ ॥
तमथाऽवभृथे कृताभिषेकं द्विजमाकर्ण्य शरीरमात्रशेषम् ।
मुदितो नृपतिः प्रसह्य तस्मै किल लक्षालयखेटकं व्यतारीत् ॥ १३ ॥

स कदाचिदहर्निशं ददानः कमनीयं मतिमास्तिकीं दधानः ।
सहितः पृतनाभिराशु गोदामतिमोदाकुलमानसः प्रतस्थे ॥ १४ ॥
स महीमघवा विधाय गङ्गा(गोदा)पयसि स्नानविधिं विधिप्रवीणः ।
अथ तन्निकटे ददर्श लिङ्गं किमपि त्र्यम्बकनामधेयमेकम् ॥ १५ ॥
मणिकाञ्चनमालिगोसहस्रद्विपजात्यश्वसुवर्णरत्नवर्षैः ।
जनजीवनदो महीमहेन्द्रः सकलानां परिपूरणं वितेने ॥ १६ ॥
स समेत्य निफालखेटमस्मिन्भटमुत्पाट्य विपक्षभूमिभर्तुः ।
चिरसञ्चितसम्पदं तुरङ्गान्मदमत्तान्दश सिन्धुरानलुण्ठत् ॥ १७ ॥
अधिरुह्य च सप्तशृङ्गशैलं बहुजन्मार्जितपुण्यपूरपाकैः ।
अथ तत्र ददर्श दृष्टिसृष्टेः फलमष्टादशबाहुमादिदेवीम् ॥ १८ ॥
अधिगत्य जगत्त्रयैकमातुश्चरणाम्भोजरजःकणप्रसादम् ।
अथ हस्तगिरिं ग्रहीतुकामस्तरसा भैरवभूपतिः प्रतस्थे ॥ १९ ॥
रथतुङ्गतुरङ्गनागपत्तिप्रकरैर्भूपतिराततज्यधन्वा ।
परितो निरुरोध हस्तशैलं किरणैर्मेरुमिव प्रचण्डधामा ॥ २० ॥
समरं तुमुलं वितन्वतोऽस्य क्षितिपालस्य निजामवीरवर्गैः ।
इह हस्तमहीधरावरोधे बत षण्मासमितो जगाम कालः ॥ २१ ॥
स कदाचिदतीव जातकोपः शिखरिद्वारि समं बलेन लग्नः ।
प्रसभं मदमत्तदन्तिदन्तस्फुटघातैरुदपाटयत्कपाटम् ॥ २२ ॥
विनिहत्य बली सपत्नभूमीरमणप्राणसमानमेकवीरम् ।
उररीकुरुते स्म हस्तशैलं विजयी भैरवसिंहसार्वभौमः ॥ २३ ॥
अथ हस्तगिरौ सवाहिनीकं निजमेकं विनिधाय वीरमुख्यम् ।
अपरं किल गालनाख्यशैलं जयशीलः स बली नृपश्चचाल ॥ २४ ॥
पृथिवीपतिरद्भुतप्रतापः सह सैन्येन ललाग तत्र दुर्गे ।
अथ दुर्गपतिः समेतसेनः समरं कर्तुमुपाजगाम घोरम् ॥ २५ ॥
अधिदुर्गकपाटमब्दमात्रं समरः सङ्गतसेनयोस्तदासीत् ।
इदमव्यभिचारि सर्वदा यत्परिरेभे नृपभैरवं जयश्रीः ॥ २६ ॥
स निहत्य बलेन दुर्गपालं परमालम्बितपौरुषो यशस्वी ।
रिपुदुर्गमलाङ्गलाख्यदुर्गं घनलक्ष्मीपरिपूर्णमेव लेभे ॥ २७ ॥

विनियुज्य तदीयरक्षणार्थं निजमेनापनिमेकमेकवीरः ।
स्पृहणीययशाः स्वराजधानीमभिमानी धरणीपतिर्विवेश ॥ २८ ॥

श्रीरामं परिपूजयन्ननुदिनं सम्भावयन्भूसुरा-
न्दुर्गाण्याकलयन्नरीन्विदलयन्सम्यक् प्रजाः पालयन् ।
सत्कीर्त्या भुवनत्रयं धवलयन्कुर्वन्प्रतापोदयं
सार्द्धं मन्त्रिजनेन भैरवनृपो राज्यं चिरं भुक्तवान् ॥ २९ ॥

श्रीभैरवक्षोणिपतेरुदाराः सप्ताभवन्कामसमाः कुमाराः ।
तेषां वरीयानथ जेयदर्णस्तस्यानुजोऽभून्नृपवीरसेनः ॥ ३० ॥
तस्यानुजन्माऽजनि नेमदेवस्तस्मादनु क्ष्मापतिलक्ष्मधाम ।
नारायणो नाम गुणार्णवोऽभून्नारायणाराधनसावधानः ॥ ३१ ॥
तस्यानुजोऽजायत ह्मांउदेवस्तस्यानुजन्माऽजनि लक्षधीरः ।
श्रीलक्षधीरस्य किलानुजन्मा सन्मानधामाऽभवदम्बदेवः ॥ ३२ ॥
ततः परं भैरवभूपसिंहे पुरन्दरार्द्धासनशोभमाने ।
श्रीवीरसेनः शमितारिसेनो नरेन्द्रसिंहासनमाससाद ॥ ३३ ॥
आनन्दिताशेषजनो वदान्यो यशोभिराशोभितदिक्कदम्बः ।
प्रौढप्रतापः सह मन्त्रिवर्गैः स नीतिरीत्यैव महीं शशास ॥ ३४ ॥
अत्रान्तरे गुर्ज्जरदेशवल्लवव्याराख्यदुर्गं चतुरङ्गसङ्गिनी ।
प्रचण्डदोर्दण्डपठाणह्मापसीप्रतीपभूपालचमूः समाययौ ॥ ३५ ॥
इमां समाकर्ण्य विपक्षवाहिनीमुद्वेलकल्लोलपयोधिभीषणाम् ।
यशोधनो वीरमशाहभूपतिर्नितान्तचिन्ताकुलमानसोऽभवत् ॥ ३६
महारथं मध्यमपाण्डवोपमं विमृश्य नारायणमात्मबान्धवम् ।
आकार्य सङ्ग्रामकृतां धुरन्धरं सगौरवं वाचमुवाच वीरमः ॥ ३७ ॥
समागताः सम्प्रतिभूरिवैरिणो व्याराख्यदुर्गं विजिगीषवः श्रुतम् ।
राज्यं तवैवेदमतस्त्वया सखे यदत्र युक्तं त्वरितं विधीयताम् ॥ ३८ ॥
इति ब्रुवाणे रमणीयमग्रजे तदैव नारायणमेदिनीपतेः ।
रणे जयश्रीकरपीडनोत्सुकः पुनः पुनर्दक्षिणबाहुरस्फुरत् ॥ ३९ ॥
ततः परं वीरमशाहभूपतिर्दिदेश साङ्ग्रामिकवस्तुसङ्ग्रहम् ।
वासांसि मातङ्गतुरङ्गमानपि प्रीताय नारायणवीरमौलये ॥ ४० ॥

तदा मुदा भैरवतुर्यनन्दने तुरङ्गमुच्चैःश्रवसः सहोदरम् ।
जवादलङ्कुर्वति शत्रुविक्रमे महानभूत्सङ्गरतूर्यनिस्वनः ॥ ४१ ॥
करालसाङ्ग्रामिकवेषभूषितः प्रवीणवैतालिकगीतविक्रमः ।
प्रतीपभूपालकरीन्द्रकेसरी नारायणक्ष्मापतिरभ्यषेणयत् ॥ ४२ ॥
नृपेण ताम्बूलमुखी विभूषिता मनोहरा श्वेतदुकूलधारिणी ।
विलोकिता वारविलासिनी पुरः साक्षाज्जयश्रीरिव वीरगामिनी ॥४३॥
सर्वत्र नारायणशाहभूपतेः सति प्रतापे किमनेन साम्प्रतम् ।
इतीव धूलीपटलैः खुरोद्धतैस्तुरङ्गमास्तस्य दिवाकरं पयधुः ॥ ४४ ॥
अथ स्फुरत्केतनचञ्चलाञ्चलैर्गजोपरिस्थैः परितर्जयन्निव ।
स शाहनारायणसैन्यवारिधिर्व्यलोकि दूरादरिभिर्भयाकुलैः ॥४५॥
ततः परं सङ्गतयोस्तयोर्द्वयोः कृपाणबाणप्रमुखाखिलायुधैः ।
सविस्मयप्रेक्षकरोमहर्षणः प्रकाममासीत्तुमुलो महारणः ॥ ४६ ॥
अत्रान्तरे भैरवराजनन्दनो वीरश्रिया लिङ्गितचारुविग्रहः ।
चण्डाट्टनादः करवालमावहन्वीरः स्वयं योद्धुमगादरातिभिः ॥४७॥
महीपतिः संयति भूमिदेवतामर्कांशुभास्वत्करवालखण्डितैः ।
विजेतुकामः क्षितिपालमौलिभिः स नालिकेरैरिव पर्यपूजयत् ॥४८॥
श्रीशाहनारायणकीर्त्तिगङ्गया द्विपद्गुणाकीर्त्तिकलिन्दकन्यया ।
सा शोणितापूरसरस्वतीमती बभौ त्रिवेणीव तदा रणक्षितिः ॥४९॥
शुण्डाः प्रचण्डा मदमत्तदन्तिनामत्रोटयद्भैरवसिंहशावकः ।
प्रचण्डदन्तावलदन्तघट्टनादथास्य खड्गः शतखण्डितोऽभवत् ॥ ५० ॥
ततः समादाय करालमुद्गरं स सत्वरं सङ्गरचत्वरं गतः ।
कठोरकण्ठीरवनादभीषणः श्रीभीमसेनस्य तुलामगाहत ॥ ५१ ॥
स मुद्गरेण प्रतिपन्थिदन्तिनां प्रचण्डशुण्डारदनानचूर्णयत् ।
तथा रिपूणामपि हन्त पातितैः कलेवरैर्भूतगणानतीतृपत् ॥ ५२ ॥
भूपालसिंहो रणकानने बलादास्फोट्य भद्रद्विपकुम्भमण्डलम् ।
समन्ततः पर्यकिरत्स्फुरद्यशो विशोभिमुक्ताफलजालमुज्ज्वलम् ॥५३॥
द्विषां तुरङ्गद्विरदादिसम्पदो न केवलं तेन भटेन लुण्ठिताः ।
दिगङ्गनाचन्दनलेपनायितं यशोऽपि तत्पूर्वपरंपरार्जितम् ॥ ५४ ॥

श्रीमद्वागुलभूमिपालतिलकश्रीशाहनारायण-
स्फूर्जत्कीर्त्तिचरित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।
भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्ये भैरवनन्दनोत्सवविधिस्सर्गोऽगमत्सप्तमः ॥ ६८ ॥

इति श्रीमदखिलभूपालमौलिललामभालामरीचिवीचिचुम्बितचरणसरोज
महाराजश्रीनारायणशाहोद्योजितदाक्षिणात्यरुद्रकवीन्द्रविरचिते
राष्ट्रौढवंशे महाकाव्ये पुत्रोत्पत्तिर्नाम सप्तमस्सर्गः ॥

अष्टमः सर्गः ।

दुर्गावती नाम ततोऽग्रपत्नी
सयौवना मन्मथराजधानी ।
चिरं निरस्ताखिलकार्यजातं
श्रीवीरसेनस्य मनो जहार ॥ १ ॥

दुर्गावती कामविमूढचेतः-
कान्ताय यद्यत्परमादिदेश ।
नृपोऽपि तस्मिन्गुणदोषचिन्ता-
मनाकलय्यैव चकार तत्तत् ॥ २ ॥

श्रीवीरसेनः प्रमदानिदेशं
विना प्रयातुं पदमप्यशक्तः ।
अन्तःपुरे वारविलासिनीनां
सङ्गीतनृत्योत्सवमाततान ॥ ३ ॥

ममापि जेता तनुशोभयैवा-
सावित्यसूयन्निव पञ्चबाणः ।
बलं समालम्ब्य विलासिनीनां
श्रीवीरसेनं सुतरां जिगाय ॥ ४ ॥

श्रीवीरसेनक्षितिपस्य किं च राज्यस्य भोक्ता तनयोऽपि नास्ति ।
इतः परं राज्यमिदं ममैव व्यर्थं ततो लौल्यमिदं पुरस्तात् ॥ ३३ ॥
इत्थं निशम्य क्षितिपस्य वाचं दुर्गाधिकारिप्रकरो जगाद ।
रन्ध्रैषिणो भूमिभुजः स्वराष्ट्रं ग्रहीतुकामा इति किंवदन्ती ॥ ३४ ॥
अतःपरं किं विधुरं पुरस्तान्महारथे त्वादृशि जागरूके ।
मनोरमा यत्कुलराज्यलक्ष्मीः प्रत्यर्थिपृथ्वीपतिगामिनी स्यात् ॥ ३५ ॥
विनापराधेन मयूरशैलाद्वधूनिदेशादवतारितोऽसि ।
तज्जन्यखेदाभिभवो न कस्मादासीनमुत्थापयति द्रुतं त्वाम् ॥ ३६ ॥
तथापि चेदग्रजभूमिपालविषादसम्पादनतो बिभेषि ।
तुरङ्गमग्रामहिरण्यभूपारत्नादिदानैः परितोषयैनम् ॥ ३७ ॥
इत्थं समाकर्ण्य गिरं तदीयां राजा समं पञ्चदशाश्ववारैः ।
कलत्रपुत्रानुगतो ग्रहीतुं शालागिरिं प्रास्थित तूर्णमादौ ॥ ३८ ॥
सुवासिनीमूर्द्धनि पूर्णकुम्भं मालाकरीं माल्यकरामपश्यत् ।
गोपालबालां दधिपात्रहस्तां द्विजद्वयं वत्सवतीं च धेनुम् ॥ ३९ ॥
अथान्तिके घोषखलाभिधानग्रामे तुरङ्गांस्तनयोपनीतान् ।
ततः परं पाथिकवाक्यवादादानीयमानं लभते स चार्थम् ॥ ४० ॥
इत्थं पुरस्तादवलोक्य राजा दैवोपनीतां शकुनावलीं ताम् ।
आनन्दपीयूषनिमग्नचित्तो राज्यं तदाऽमन्यत लब्धकल्पम् ॥ ४१ ॥
उत्कण्ठितो धीरसमीरलोलद्रुमावलीपल्लवपाणिकम्पैः ।
शालागिरिस्तुङ्गतुरङ्गरूढं समाजुहावेव नरेन्द्रमेनम् ॥ ४२ ॥
दिगन्तविश्रान्तविशालकीर्त्तिः प्रतापसन्तापितवैरिमूर्त्तिः ।
हिमाचलं सिंह इव क्षितीशः क्षणेन शालागिरिमध्यरोहत् ॥ ४३ ॥
उपायनीकृत्य मनोरमाणि प्रसूनवस्तूनि च दुर्गपालाः ।
जनाश्च सर्वे जयशब्दपूर्वं नारायणं नाम नृपं प्रणेमुः ॥ ४४ ॥
पौरस्त्रियो वल्लभपुत्रवत्योऽलङ्कृत्यसम्पूर्णकुम्भाः प्रसन्नाः ।
श्रीशाहनारायणपार्थिवाय नीराजनां माङ्गलिकीं वितेनुः ॥ ४५ ॥
ततोऽभवन्मङ्गलतूर्यघोषः शक्रो समाकर्ण्य समीपमेत्य ।
स्वर्गीयतूर्यागमनभ्रमेण द्वाराणि सद्यः पिदधे नगर्याः ॥ ४६ ॥

अदात्तदाऽसौ गिरिकोशजातं द्विजातिवर्गाधिपनिर्द्धनेभ्यः ।
घटेन सङ्ख्याय तथा हि मेघः सर्वत्रवर्षी न विशेषदर्शी ॥ ४७ ॥
महीधरो भूमिभुजा विरेजे महीधरेणापि महीमहेन्द्रः ।
पूर्वाचलो घर्ममरीचिनेव घर्मद्युतिः पूर्वमहीभृतेव ॥ ४८ ॥
पुरन्दरेणेव सुराः सरागाः सदाशिवेनेव गणाः सहर्षाः ।
श्रीशाहनारायणपार्थिवेन प्रजा ननन्दुः परिपूर्णकामाः ॥ ४९ ॥
अत्रान्तरे चोपखलाभिधानग्रामाचरः कश्चिदुपेत्य तूर्णम् ।
नारायणो हन्त हयान्गृहीत्वा कापि प्रयातीति शशंस राज्ञे ॥ ५० ॥

श्रीनारायणनृपतेरशेषवृत्तं
विज्ञातुं निजमथ वीरमक्षितीशः ।
वीराख्यं बलयुतमेकलासखानं
साशङ्कः सपदि नियोजयाम्बभूव ॥ ५१ ॥

गच्छन्नसौ पथि ददर्श पुरः समेतं
श्रीनिम्बदीक्षित इति द्विजवर्यमेकम् ।
पप्रच्छ चेति भवता श्रुतमस्ति किञ्चि-
न्नारायणः क्व वरिवर्ति नरेन्द्रबन्धुः ॥ ५२ ॥

अथाग्रजन्मा वदति स्म वाचं
नारायणः सम्भृतसैन्यभारः ।
शालागिरौ स्वामितयास्ति सर्व-
सामन्तचूडामणिचुम्बिताङ्घ्रिः ॥ ५३ ॥

तत्त्वया बलवतोऽस्य मेदिनीवासवस्य निकटे न गम्यताम् ।
आगतस्य मृगराजसन्निधौ का गतिर्ननु मृगस्य भाविनी ॥ ५४ ॥

इत्थं निशम्य वचनं द्विजपुङ्गवस्य
प्रोद्भूतभीतिभरकम्पितगात्रयष्टिः ।
वीरो निवर्त्य समुपेत्य मन्दुरोलं
राज्ञे समस्तमिदमावेदयाञ्चकार ॥ ५५ ॥

राजा तमाकर्ण्य गुरुप्रतापं स्फुरन् गजः सिंहमिवात्ततापम् ।
स्वनिदासिंहासनशोभमानकामारपदे साप्यनमस्यपिङ्न ॥ ५६ ॥

goddess, remaining invisible, told the king that the boy will be known as Râshtraudha, as he would support both his kingdom and the family. He learnt the four lores from Gautama Rishi, the military art from Kârtikeya and the Vedas from S'iva. No particulars of his reign are recorded. After him Vîrasena, Kântivîra, Sâhasiyârjuna, Mallikârjuna, Jayas'ila and Gangâjala successively came to the throne. Gangâjala got through the favour of goddess Lâtanâ, two sons Kâlasena and Gopachandra. Kâlasena, his elder son, succeeded him. After a long reign, he went to forest for penance, placing his brother on the throne. There in the forest, he pleased Lâtanâ and Gautama through his penance and through the worship of Mahâkâla got the kingdom of Ujjayanî. With the sword given by the goddess Chakres'varî, he vanquished his enemies and entered his capital Kanouj. With his younger brother, he then set forth towards the North. The victorious king gave over the Kurukshetra to the Brahmanas. Hearing that the King of Kâs'î sacked Kanouj with large forces, Kâlasena started with his brother to rescue his capital. Seeing the waters of the Yamunâ unfordable, Kâlasena wavered in his determination. His younger brother, seeing this, cut off his own head and offered it to his brother for crossing the river. Kâlasena crossed the river and killing the army of the king of Kâs'î, entered victorious into the city. In order to bring his brother to life, he worshiped the goddess Chakres'varî, who by joining the head and body of his brother brought him to life. As the head of Gopachandra joined obliquely appeared dreadful, the goddess called him Bâgula. The descendants of Gopachandra were henceforward called Bâgulas. Kâlasena then putting Gopachandra on the throne of Kanyâkubja ruled over Ujjain. [illegible] Kalingadeva, who succeeded Gopachandra, conquered the countries of Karnâta, Lâta, Anga, Kalinga, and Vanga. After him Tripurâri, Khadgasena, Arjuna, Bhîmasena, Ballâla [illegible] Vatsarâja, Nâganâtha, Purandara, Raghava, Vîrapâla, Suras'a, [illegible] and [illegible] occupied successively the throne of Kanouj. [illegible] had [illegible]. The [illegible] Jallinga came to the throne, [illegible] Harihara, Yas'as'a and Sabala [illegible] to the [illegible] (capital of Gujarat) [illegible] through the [illegible] of S'iva, got the [illegible] of [illegible] [illegible]. Yas'as'a and Sabala returned to

श्रीमन्तं चतुरमुदारधीरवीरं
जेतारं सकलदिशां जयन्तकल्पम् ।
श्रीनारायणनृपतिः प्रतापशाहं
सानन्दं न्यदधि तदैव यौवराज्ये ॥ ६५ ॥

श्रीमद्बागुलभूमिपालतिलकश्रीशाहनारायण-
स्फूर्जत्कीर्त्तिचरित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।
भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्ये(ऽस्मिन्किल शालदुर्गविजयस्सर्गोऽगमच्चाष्टमः) ॥ ६६ ॥

॥ इति श्रीमदखिलभूपालमौलिललाममालामरीचिवीचिचुम्बितचरणसरोजमयूरगिरिकेसरिमहाराजश्रीनारायणशाहोद्योजितदाक्षिणात्यरुद्रकवीन्द्रविरचिते राष्ट्रौढवंशे महाकाव्ये शालागिरिविजयो नाम अष्टमस्सर्गः ॥

नवमस्सर्गः ।

प्रतापशाहाभिधमग्रसूनुं निवेश्य शालागिरिगोपनार्थम् ।
श्रीशाहनारायणसार्वभौमो मयूरशैलं प्रति गत्वरोऽभूत् ॥ १ ॥
दिशः प्रसन्नाः सहसा बभूवुर्ववौ समीरोप्यनुकूल एव ।
मृगास्तदा दक्षिणतो विचेरुः फलं विपक्वं तरवो वितेरुः ॥ २ ॥
मार्गे दधिक्षीरघृतादिपूर्णान्घटानतिस्वादुफलावलिं च ।
ताम्बूलपर्णक्रमुकप्रसन्नान्यादाय पौराः क्षितिपं प्रणेमुः ॥ ३ ॥
यान्तः सलीलं मदमुद्वहन्तः सम्प्राप्य नारायणशाहसेवाम् ।
घण्टारणत्काररवैर्मृगेन्द्रानाकारयामासुरिव द्विपेन्द्राः ॥ ४ ॥
अमन्दनिर्यन्मदवारिसान्द्राः सेनागजेन्द्राः पुरतः प्रचेलुः ।
विशालशालाचलमौलिचुम्बिस्रवत्पयोदा इव सेवमानाः ॥ ५ ॥
अचासवन्यद्विपगन्धवाहैर्धूताङ्कुशैः कोपकषायभावैः ।
मोघीकृताधोरणयत्नमीपे स्थातुं न वा गन्तुमपि द्विपेन्द्रैः ॥ ६ ॥

भूमण्डलीलङ्घनभूरिखिन्नान्दक्षिणपक्षाग्रपदे तुरङ्गाः ।
गजान्मुकूलध्वनिरोधखेलान्तुलङ्घ नालीपुरिव प्रयातुम् ॥ ७ ॥
श्रीशाहनारायणवाजिराजिप्रोत्खुराघातनिपीडिताङ्गी ।
वसुन्धरा स्यन्दननेमिधाराचीत्कारसीत्काररवं व्यधत्त ॥ ८ ॥
नारायणक्ष्मापतिसैन्यभारभुग्नो भुजङ्गाधिपतिः कथञ्चित् ।
स्फारीकृतोत्फालफणासहस्रस्तम्भेषु कम्पेन धरामधार्षीत् ॥ ९ ॥
इतस्ततो वर्त्मनि सङ्गतानां सङ्गेन सामन्तपताकिनीनाम् ।
नगापगानामिव देवगङ्गा पुरस्सरी संववृधेऽस्य सेना ॥ १० ॥
अनेकमातङ्गतुरङ्गसङ्गी परैरलङ्घ्यो निजकामचारी ।
कपिद्रुतादेकहयेनयेनैवभौ समुद्रादधिकं बलौघः ॥ ११ ॥
उत्तुङ्गमातङ्गधुरीणगामी सामन्तभूमीपतिचक्रवर्ती ।
मयूरशैलं रमणीयमारात्तमक्षिलक्षीकुरुते स्म वीरः ॥ १२ ॥
समीरलोलन्नगरीपताकाचेलाञ्चलव्याजकलापभारम् ।
यो वीक्ष्य नारायणमेवमारान्मदोदयात्ताण्डवयाञ्चकार ॥ १३ ॥
कृत्वा विहारं रजनीशशिभ्यां मुक्तानि मङ्क्षु जलधौ गताभ्याम् ।
तल्पादिव द्राङ्नयति प्रभाते ताराप्रसूनानि यतोऽभ्रदेशः ॥१४॥
धरापरागेण च यत्र नृत्यद्वाराङ्गनाचङ्क्रमणोत्थितेन ।
मग्नेन पङ्कीभवता सुधांशौ कलङ्कशङ्कावतरो वितेने ॥ १५ ॥
यत्तुङ्गशृङ्गस्खलनप्रसङ्गप्रकामसम्भावितभङ्गभीत्या ।
दिनेश्वरः प्रार्थितविश्वकर्मा चक्रे निजस्यन्दनमेकचक्रम् ॥ १६ ॥
यदीयशृङ्गे स्खलति प्रतुङ्गे दिनेश्वरस्यन्दननेमिधारा ।
मयूरमोराचलमध्यभागे कुतोऽन्यथा खण्डितभूमिरेखा ॥ १७ ॥
यत्रैकवीरा शवरीशरीरा नीराजिता वीरकिरीटहीरैः ।
स्वभक्तसर्वेप्सितदानदक्षा साक्षादहो नन्दति विश्वमाता ॥१८॥
विदेहपुत्रीपरिपूजितो यश्चराचराधारपदारविन्दः ।
सिन्दूरपूरद्युतिचुम्बिकुम्भो गजाननस्तिष्ठति यत्र साक्षात् ॥१९॥
उत्फुल्लमल्लीलवलीमतल्लीवल्लीसमुद्यत्कुसुमच्छलेन ।
कैलासहेमाचलशीतशैलानदर्शनीयान्हसतीव भूयः ॥ २० ॥

दृष्टोऽपि भूयिष्ठमसौ नृपस्य परं चमत्कारभरं चकार ।
प्रेमैकपात्रं रमणीयवस्तु प्रतिक्षणं नूतनतां तनोति ॥ २१ ॥
दिगन्तविश्रान्तगभीरभेरीभाङ्कारकोलाहलमाकलय्य ।
पर्याकुलः पौरजनस्तदानीं सौधाग्रमासाद्य ददर्श सैन्यम् ॥२२॥
स प्राप नारायणसैन्यभारो मयूरशैलं मुदितस्तदानीम् ।
सूर्योऽपि पूर्वाचलमौलिहर्म्यं नारायणं वीक्षितुमारुरोह ॥ २३ ॥
स नागरीभिर्नयनारविन्दैराचारलाजैश्च कृतोपचारः ।
उत्तोरणं वारणराजहार्य(?)श्चतुष्पथं प्रापदुरुप्रतापः ॥ २४ ॥
उत्तुङ्गसौधाग्रलसत्पताकाचेलाञ्चलाकारणमादधानम् ।
समस्तसम्पत्तिभरेण पूर्णं समासदद्राजगृहं महीपः ॥ २५ ॥
अमात्यवर्गो विनयप्रधानो नयप्रधानो विलसद्गुणाय ।
श्रीशाहनारायणपार्थिवाय राज्याभिषेकोत्सवमित्यकार्षीत् ॥२६॥
आनीय गङ्गायमुनादिनानासत्तीर्थसार्थादमलोदकानि ।
सुवर्णकुम्भानभिषेकहेतोरपूरयन्मन्त्रिगणस्सदर्पः ॥ २७ ॥
तीर्थाहृतैः काञ्चनकुम्भतोयैर्गुरुं पुरस्कृत्य समन्त्रघोषम् ।
नारायणं भैरवभूपराज्ये समुल्लसन्मङ्गलमभ्यषिञ्चत् ॥ २८ ॥
सुवर्णकुम्भाहरणप्रवीणपाणिस्खलत्कङ्कणनादमिश्रः ।
ससम्भ्रमं पौरविलासिनीनां मञ्जीरमञ्जुध्वनिरुल्ललास ॥ २९ ॥
तूर्याणि नेदुर्ननृतुर्नटौघाः समुज्जगुर्गीतकलाप्रवीणाः ।
पेठुः प्रबन्धान्विरुदावलीनां तत्रोत्सवे मागधबन्दिनोऽपि ॥ ३० ॥
द्वात्रिंशता हेममयैरुदारैः सिंहैः समासादितभूरिशोभम् ।
सुमेरुशृङ्गं मृगराडिवासौ सौवर्णसिंहासनमध्यतिष्ठत् ॥ ३१ ॥
परिस्फुरत्काञ्चनदण्डशोभि छत्रं निरीक्ष्य क्षितिपालमौलौ ।
मुखश्रिया निर्जितमिन्दुबिम्बं किमागतं सेवितुमित्यमानि ॥३२॥
आन्दोलनावत्करकङ्कणालीकोलाहलोन्निद्रितमन्मथाभ्याम् ।
महीपतिर्लोहितचामराभ्यां विलासिनीभ्यां परिवीज्यते स्म ॥३३॥
गुणोत्करस्पर्शवशेन भूमिं हिरण्मयीमेव विधाय वोढा ।
स मौलिना हैमकिरीटभाजा विचक्षणैरित्यनुमीयते स्म ॥ ३४ ॥

मन्त्राक्षतैरक्षतशक्तियुक्तैरहो हरिद्रारससङ्गपिङ्गैः ।
तस्यार्चितः प्राह ललाटपट्टः सुवर्णवर्गैरिव भाग्यशोभाम् ॥ ३५ ॥
भूमण्डलाखण्डलमण्डलानां स्यादेष नूनं तिलकायमानः ।
प्रसाधकैरित्यनुमाय हैमस्तदीयभाले तिलको न्यधायि ॥ ३६ ॥
सौवर्णपट्टं मुकुटे दधानः स्फुरद्दुकूले विमले वसानः ।
स राज्यलक्ष्मीं रुचिरां वृणानस्तदा विवाहोत्सवभागिवाभूत् ॥ ३७ ॥
गवां गणं काञ्चनमालिनीनां प्रदाय राज्ञा जगतीसुरेभ्यः ।
अमोचि कारागृहवर्त्तिलोको न केवलं पञ्जरपत्रिणोऽपि ॥ ३८ ॥
अथ स्फुरच्चामरवीजितस्तां सभां विभान्तीमभिगम्य रम्याम् ।
श्रीशाहनारायणभूमिपालः सिंहासनं मण्डयति स्म हैमम् ॥ ३९ ॥
बुधैरनेकैर्गुरुभिः कवीनां गणैः कलानां निधिभिश्च याऽसौ ।
अनेन गोत्रप्रतिपालकेन रेजेऽधिकं गोत्रभिदः सभायाः ॥ ४० ॥
मित्रद्विजज्ञातिगुरुप्रधानविद्वत्सुहृद्बान्धवगायकाद्याः ।
निरन्तरं दक्षिणपार्श्वभागे तिष्ठन्ति यत्र क्षितिवल्लभस्य ॥ ४१ ॥
अनेकनानास्त्रधराः प्रवीरा यत्र प्रभोः पश्चिमदिग्विभागे ।
सामन्तसम्बन्धिवयस्यपौरचमूचराश्चोत्तरदिग्विभागे ॥ ४२ ॥
यस्यां पठन्मागधवन्दिसूतगन्धर्वनृत्यङ्करता नृपाग्रे ।
दूरेण तेभ्योऽधरभूमिभागे सदा निषादाधिपवृन्दमास्ते ॥ ४३ ॥
यस्यां महाराजनिदेशसारा दिगन्तविश्रान्तयशःप्रसाराः ।
गुणैरुदाराः परिभूतमारास्तिष्ठन्ति वीरप्रवराः कुमाराः ॥ ४४ ॥
यस्यां नमन्मौलिललामदीपैर्भूपालपादाम्बुजहेमपीठम् ।
समस्तसामन्तनृपालवीरा नीराजयन्ति स्फुटमादरेण ॥ ४५ ॥
यत्र स्फुरत्पण्डितमण्डलीनां चकास्ति षड्दर्शनसागरेषु ।
तत्वावबोधामृतसारदोहे(हो) विचारमन्थाचलचारुघोषः ॥ ४६ ॥
साहित्यगर्भैर्विशदप्रसादैः पीयूषधारामधुरैर्वचोभिः ।
सभा कवीनामधिपावदानं यस्यामुपश्लोकयति प्रवीणा ॥ ४७ ॥
लोकत्रये भूतचरं भवन्तं तथाखिलं भाविनमर्थसार्थम् ।
करारविन्दामलकायमानं ज्योतिर्विदो यत्र निवेदयन्ति ॥ ४८ ॥

सर्वेषु रोगेषु चिराय दूरे येभ्यो भयादेव पलायितेषु ।
नानारसोत्तारणजन्यखेदं भजन्ति यस्यां न कदापि वैद्याः॥४९॥
अनेकसङ्गीतविदामजस्रसान्निध्ययोगात्सुतरां प्रवीणाः ।
गायन्ति यस्यां क्षितिपालकीर्तीर्विलासशारीशुकराजहंसाः॥५०॥
यस्यां सदा वारसरोरुहाक्षीविलासलास्योत्सवकौतुकानि ।
सचेतसः कस्य न चित्तवृत्तिं कुर्वन्ति कन्दर्पसमुद्रमग्नाम् ॥ ५१ ॥
समग्रभूपालचरित्रलक्षं विधाय यस्यां ननु पूर्वपक्षम् ।
श्रीशाहनारायणराजवृत्तं सिद्धान्तयत्युत्तमवन्दिवृन्दम् ॥ ५२ ॥
गुणैरुदारे नृपतौ गुणिभ्यस्तद्याचितादप्यधिकं ददाने ।
यत्रोपविष्टो जितकल्पवृक्षो वदान्यवर्गोऽपि चमच्चकार ॥ ५३ ॥
मरीचिवीचीरमणीयरत्नस्तम्भाः स्फुरत्काञ्चनभित्तयश्च ।
सभाजनाङ्गप्रतिविम्बसङ्गात्सजीवचित्रा इव यत्र रेजुः ॥ ५४ ॥
चतुःसमुद्रावलिराजमानवसुन्धरामण्डलमन्दिराणाम् ।
आनन्दसन्दोहजुषां जनानां सम्पद्यते यत्र समस्तकार्यम् ॥५५॥
नमस्कृतो यत्र जनैः स राजा दिने दिने लब्धकलाकलापः ।
तमो विलुम्पन् जगति प्रजानां नवोदितश्चन्द्र इव व्यराजत् ॥५६॥
यत्रोपविष्टः सुकृतैकनिष्ठः सतां वरिष्ठः प्रचुरप्रतिष्ठः ।
तदाऽवदद्वागुलवंशदीपः प्रतीतचित्तः परमाप्तवर्यान् ॥ ५७ ॥

यत्सर्वे मयि सानुरागमनसः साम्राज्यमासादितं
पूर्वेषां च यशः स्थिरं यदरयो जाताश्च घाताहताः ।
सोऽयं पर्वतनन्दिनीशमहिमा देव्या जनन्यास्तथा
श्रीमद्भैरवपार्थिवस्य चरणाम्भोजप्रसादोदयः ॥ ५८ ॥

चिरंजीव महाराज सत्यमेव वचस्तव ।
सभाधिभासिभिः सभ्यैरिति भूपोऽभ्यनन्दितः ॥ ५९ ॥

निशम्य नारायणभूमिभर्तुश्चेतश्चमत्कारकरीं गिरं ताम् ।
आनन्दवल्गत्पलितोरुमौलिस्ततोऽवदच्छार्ङ्गधरो गरीयान् ॥६०॥
राजंस्त्वदीया जननी यमाम्बा सा केन वर्ण्या जगतामिदानीम् ।
पतिव्रतावृन्दपवित्रचित्रचारित्रसम्पादनसिद्धसूत्रिः ॥ ६१ ॥

यस्याः समाकर्ण्य गुणानगण्यान् हरावुदञ्चत्पुलके सलज्जा ।
तपोविधानाय तदादि पद्मा पद्मासनं मुञ्चति नाधुनापि ॥ ६२ ॥
गोभूमिवासःकलधौतमुक्तातुरङ्गमानङ्गनिकेतनानाम् ।
अकल्पितान्याश्रितकल्पवल्ल्या दानान्यनेकानि यया कृतानि ॥६३॥
दत्तं विना विस्मरणं न यस्याः कदापि कस्यापि विवेकवल्ल्याः ।
सुधागिरं माधवकीर्त्तिगङ्गास्नाता न पस्पर्श यदीयजिह्वा ॥ ६४ ॥
या भैरवानन्दकरी विराजद्विशालनेत्रा मणिकर्णिकाढ्या ।
कारागृहान्मोचितसर्वजन्तुर्वाराणसीवातितरां विरेजे ॥ ६५ ॥
यस्याः शरच्चन्द्रमरीचिगौरीगुणैस्तरङ्गैरिव राजमाना ।
भागीरथीव स्पृहणीयकीर्त्तिः सर्वं वरीवर्त्ति जगत्पवित्रम् ॥ ६६ ॥
या श्रीमहादेववधूरपर्णा कापि स्फुरत्काञ्चनकल्पवल्ली ।
सदैव नारायणवन्द्यमाना गौरीव कल्याणकरी विरेजे ॥ ६७ ॥
अरुन्धतीमुख्यसमस्तसाध्वीश्चिराय चित्तानितु(?)वाक्यरुद्धाः ।
आत्मानमाबध्य किलात्मनैव या मोचयामास गुणैरुदारा ॥६८॥
अस्मादृशानामिव मूर्त्तभाग्यं नारायणो नाम च वर्णितोऽभूत् ।
तस्याः प्रसादेन यमाम्बिकायाः किं किं न सम्भावितमिष्टजातम् ॥६९॥
इमां समाकर्ण्य गिरं मनोज्ञां गरीयसीं शार्ङ्गधरद्विजस्य ।
श्रीशाहनारायणसार्वभौमस्तदा मुदा निर्भरमभ्यनन्दत् ॥ ७० ॥
अथ शार्ङ्गधरात्मजेन राजा जगदे लक्ष्मणपण्डितेन तेन ।
श्रवणेन बृहस्पतिः कुमारः पितृभक्त्या विनयेन लक्ष्मणो यः ॥७१॥
यस्याः कुक्षौ दिनकरकुलोदारकोटीरहीरः
साक्षान्नारायणनरमणिर्विश्वसंरक्षणाय ।
कौसल्याया इव नृपवरो रामभद्रोऽवतीर्णः
सेयं केषामिव गुणवती नार्चनीया यमाम्बा ॥ ७२ ॥
अद्यापि दानोदकसिन्धुबिन्दुव्रातस्फुरन्मौक्तिकहारहृद्याम् ।
विप्राग्रहाराः पुनरामुदाराः सर्वत्र यस्याः प्रथयन्ति कीर्त्तिम् ॥७३॥
इत्थं गिरं लक्ष्मणपण्डितीयामाकर्ण्य नारायणभूमिपालः ।
आनन्दमन्दोहसुधासमस्तचारुहरिद्विहारमानसोऽभूत् ॥ ७४ ॥

लुमायिजिं शार्ङ्गधराख्यपण्डितं ततस्तृतीयं किल भावपण्डितम् ।
दुर्गावतीवीरमसेनहूतये स प्राहिणोन्मूर्ध्नि मयूरभूभृतः ॥ ७५ ॥
ते तत्र गत्वा विनयप्रधानैरमुष्य वाक्यैः परितोष्य राज्ञः ।
तौ दम्पती वीतभयौ तदानीमानिन्युरुर्वीशतमन्युधाम ॥ ७६ ॥
आलिङ्ग्य गाढं सुभुजो भुजाभ्यां मूर्द्धानमाघ्राय च सानुरागम् ।
श्रीवीरसेनः प्रणतं पुरस्तादुपस्थितं सोदरमित्यवादीत् ॥ ७७ ॥

आयुष्मान्भव वत्स सम्प्रति जरावैक्लव्यविप्लाविताः
क्षोणीरक्षणसङ्कटाद्वयमितो निष्कास्य वीर त्वया ।
श्रीगोविन्दपदारविन्दभजने सानन्दमासादिताः
सेयं कापि तवौचिती विजयते भक्तिं गुरौ तन्वतः ॥ ७८ ॥

एवं श्रीवीरसेनक्षितिपकुलमणेर्वाचमाकर्ण्य सारा-
मेतस्मै शाहनारायणधरणिपतिर्धर्मपत्नीयुताय ।
दत्त्वा नानासुवर्णाभरणमणिगणग्रामवासोहयार्वां-
स्तूर्णं संपत्तिपूर्णं सततवसतये सौधमेकं व्यतार्षीत् ॥ ७९ ॥

श्रीमद्बागुलभूमिपालतिलकश्रीशाहनारायण-
स्फूर्जत्कीर्त्तिचरित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।
भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्येऽस्मिन्नवमोऽभिषेकरसिकस्सर्गो निसर्गो[illegible] ॥ ८० ॥

॥ इति श्रीमदखिलभूपालमौलिमुकुट[illegible]
मयूरगिरिकेसरिश्रीमहाराजनारायणशाहो[illegible]
राष्ट्रौढवंशे महाकाव्ये नवमस्सर्गः ॥

[illegible]सर्गः ।

अथो मयूराचलसानुसानुरूपः प्रजाऽऽपारो[illegible] ।
पुरन्दरश्री[illegible] स [illegible] ॥ १ ॥
स नीतिरीतिं मनुना प्रणीतां [illegible] ।
अभून्मयूराचलराजसिंहः [illegible] ॥ २ ॥

सम्प्राप्य तं सर्वगुणाभिरामं राजानमाजानुविलम्बिबाहुम् ।
आनन्दसन्दोहनिमग्नचित्तास्तदा बभूवुः प्रकृतिप्रधानाः ॥ ३ ॥
वर्णैरसङ्कीर्णतया पवित्रैः स्फुरच्चरित्रैर्विदधे स्वधर्मः ।
पट्टाम्बरेषु प्रचुरेषु वर्णसाङ्कर्यमासीत्परमस्य राज्ये ॥ ४ ॥
तस्मिन्महीं शासति राजसिंहे सद्योमनोहारिणि कामुकानाम् ।
अभूत्परं पङ्कजलोचनानां नेत्राञ्चले तस्करशब्दवृत्तिः ॥ ५ ॥
सिंहासनाध्यासिनि तत्र वीरे मृगीदृशामेव विलोचनानाम् ।
बभूव कालाञ्जनपङ्कसङ्गाद्कीर्त्तिपूरः श्रुतिलङ्घनेन ॥ ६ ॥
तस्मिन्नृपे कुर्वति रामराज्ये बभूव दण्डः कुसुमोत्कराणाम् ।
धम्मिल्लभारे परमङ्गनानां नितान्तमासक्तिमुपागतानाम् ॥ ७ ॥
प्रकुर्वतोः कामुकदृष्टिरोधं कठोरयोरुन्नतवृत्तयोश्च ।
वक्षोजयोरेव मृगेक्षणानां तस्मिन्नृपे काञ्चनशृङ्खलाऽभूत् ॥ ८ ॥
तदीयराज्ये वनवासिनीनां मृगाङ्गनानां च पुराङ्गनानाम् ।
स्पर्द्धा परं चञ्चलचेष्टितानां विलोचनानां विषये बभूव ॥ ९ ॥
मनस्विनां मानसमीनबन्धे जालायमानः स्मरधीवरस्य ।
विलासिनीनां मलिनोऽतिवक्रो वेणीकलापः परमाप बन्धम् ॥ १० ॥
तस्मिन्नहो जाग्रति राजहीरे कदापि नासीत्कलहः प्रजानाम् ।
विदग्धयूनोः परमं कदाचित्सपत्नीनिपूर्वः क्षणमाविरासीत् ॥ ११ ॥
तस्योदये दातरि दक्षपाणौ कुर्वन्निषेधं परिवेषकस्य ।
परं न वामः सहते स्म पाणिः शौचैककार्ये विहिताधिकारः ॥ १२ ॥
तस्मिन्महीं शासति वीरहीरे परं नवोढाजनमानसेषु ।
भयाधिकारः प्रियसङ्गमेऽभूदन्यत्र कुत्रापि कदापि नासीत् ॥ १३ ॥
तस्मिन्महीं रक्षति पादपानामासन्फलान्येव पचेलिमानि ।
नितान्तमानन्दजुषां प्रजानां भाग्यान्यपि प्राग्भवसञ्चितानि ॥ १४ ॥
तत्रैव सत्रप्रकरप्रपाणां तले पुरग्रामपथान्तरेषु ।
तेन क्षितीशेन सति प्रणीते दीनास्त्वमर्त्या न कदाप्यसीदन् ॥ १५ ॥
[illegible] प्रजानां बभूव देवः किल कामवर्षी ।
[illegible] पूर्णाणि ॥ १६ ॥

कोपाकुलान्सामभिरर्थलुब्धान्दानेन भेदेन तथा समर्थान् ।
दण्डेन नीचान्वशयन्नरेन्द्रः स्वाधीनमाधादिति सर्वराष्ट्रम् ॥ १७ ॥
समन्ततो जाग्रति तत्प्रतापे वातोऽपि पस्पर्श न पान्थलोकान् ।
कुतः कथा तत्र च तस्कराणां कुतस्तरां नाम धनापहारः ॥ १८ ॥
तस्मिन्परं भूभुजि दाडिमानां भिदेलिमं नो हृदयं बभूव ।
भूमण्डलाखण्डलमण्डलानामपि प्रचण्डाशुगखण्डितानाम् ॥ १९ ॥
बिम्बोष्ठनेत्रोत्पलकान्तिसङ्गाद्गुञ्जोपमं तच्चकितारिनार्याः ।
नीतानि मार्गेऽखिलभूषणानि चौरेण मुक्ताफलकं न नीतम् ॥ २० ॥
दिने दिने निर्मलदाननीरैर्नारायणेनैष विवर्द्धितो यः ।
तस्य स्फुरत्कीर्त्तितरोः प्रतीमः पुष्पाणि ताराः फलमिन्दुबिम्बम् ॥ २१ ॥
आपूर्वशैलाच्चरमाचलाच्च प्रालेयशैलान्मलयाचलाच्च ।
आज्ञां यदीयां शिरसा समग्रा भूपामिव क्षोणिभुजो वहन्ति ॥ २२ ॥
अस्ताचलः प्रागुदयाचलस्तु प्रत्यक्तुषाराद्रिरवाग्विभागे ।
उदक् पटीराचल इत्युदारास्तदीयकीर्त्तेर्गतयो विचित्राः ॥ २३ ॥
सन्ति क्षितौ भूमिभुजः सहस्रं राजन्वती भूरमुनैव राज्ञा ।
दिवि ग्रहा जाग्रति वा न के के मार्त्तण्डशोभामुपयातु को वा ॥ २४ ॥
त्रैलोक्यमुक्ताफलकर्णपूरैः स्वकीर्त्तिकर्पूरपरागपूरैः ।
दिक्कन्यकानां कुतुकेन धूलीकेलीविलासानकरोन्नरेन्द्रः ॥ २५ ॥
आश्चर्यमेतस्य विराजमाने प्रतापसूर्ये रिपुसुन्दरीणाम् ।
मुखारविन्दानि निमीलितानि प्रभूतपूरा नयनाम्बुनद्यः ॥ २६ ॥
मयूरभूमीधरसंस्थितोऽपि समस्तभूमीपतिमण्डलानि ।
सहस्रधामेव करैरुदारैश्चारैः समाक्रामति स स्म वीरः ॥ २७ ॥
भक्त्याऽधमर्णीकृतरामचन्द्रः कीर्त्या वराकीकृतपूर्णचन्द्रः ।
दानेन कर्णस्तरसा सुपर्णः सोऽभूदभीः पालितसर्ववर्णः ॥ २८ ॥
स प्रत्यजानादभिरूपमेव व्यधात्प्रतिज्ञातममोघमेव ।
स नूनमेकत्र मुधाप्रतिज्ञः प्रतिश्रुतादप्यधिकप्रदाने ॥ २९ ॥

आपातरम्यैर्विषयैरमीभिः कदाप्यनाकृष्टमना मनस्वी ।
धर्मैकमूर्त्तिर्वयसा युवाऽपि ज्ञानेन वृद्धः समभून्नरेन्द्रः ॥ ३० ॥
लोकोत्तरां तस्य शरीरशोभामालोक्य खर्वीकृतरूपगर्वः ।
मन्ये महादेवदृगग्निकुण्डे स्वदेहपातं मदनश्चकार ॥ ३१ ॥
पदातिमातङ्गतुरङ्गमाणां पुरा कृशानाममुना नृपेण ।
निदाघसन्तप्तसरोवराणां धाराधरेणापि कृताऽतिपुष्टिः ॥ ३२ ॥
महौजसो दत्तनितान्तवित्ताः सङ्ग्रामसम्प्राप्तयशःप्रतापाः ।
धनुर्भृतो भूमिपुरन्दरस्य प्राणैरपि प्रत्युपकर्त्तुमीषुः ॥ ३३ ॥
नारायणक्षोणिभुजा सनाथा सम्पूर्णसर्वाङ्गविराजमाना ।
आनन्दपीयूषपयोधिमग्ना सा राज्यलक्ष्मीः सुतरां विरेजे ॥३४॥

विद्वन्मण्डलकल्पपादपवनं विद्योतिवाग्देवता-
सङ्केतायतनं नितान्तकमलालीलाविलासास्पदम् ।
लक्ष्मीवल्लभभक्तिभाण्डभवनं भूमण्डलीमण्डनं
कीर्त्तेः केलिनिकेतनं विजयते श्रीशाहनारायणः ॥ ३५ ॥

यत्कीर्त्तिः प्रसरीसरीति परितो यत्पाणिपद्मे रमा
सानन्दं विजरीहरीति वदने वाणी नरीनर्त्ति च ।
श्यामं धाम वरीभरीति हृदये यो रामनामास्पदं
सोऽयं धर्मरतिः सदा विजयते नारायणक्ष्मापतिः ॥ ३६ ॥

यस्मादुत्पन्नशङ्काः प्रतिभटपृथिवीनायकाः सायकाङ्काः
कौपीनाङ्काः कथञ्चिद्गिरिवरविवरे वासरान्वाहयन्ति ।
नम्रक्ष्मापालमालामुकुटमणिमहोराजिनीराजिताङ्घ्रि-
स्तस्मान्नारायणक्ष्मापतिकुलतिलकात्कः परः सार्वभौमः ॥३७॥

नित्यं नूतनहेमरङ्कनिकरैश्चाम्पेयपुष्पोत्करै-
र्विश्वाशावनवीथिमुज्ज्वलमहामुद्राभरैर्माधुरैः ।
यः श्रीमाननवेक्षणीयवपुषं कुर्वन्वसन्तोऽद्भुतः
सानन्दं सकलं यशःपरिमलैर्ब्रह्माण्डमापूरयत् ॥ ३८ ॥

Bhairavasena's reign was very glorious. The ruler of the Mandapa Parvata (the fort of Mându) sought protection from Bhairavasena through the fear of Sulem Shah Bhairavasena defeated Sulem Shah and gave shelter to the ruler of Mându for a long time.[1] Bahadur Shah, the Sultan of Gujarat, came to conquer the South, and called Bhairavasena in his aid. Bhairavasena set forth with the consent of his counsellors to join Bahadur Shah, who now attacked Devagiri[2] A battle ensued, in which Bhairavasena showed much bravery, but was wounded in the forehead Nizam Shah, the ruler of Devagiri, was at last conquered, and his long-collected wealth was looted, and a general was placed on the fort by Bahadur Shah. Bhairavasena was now requested by Bahadur Shah to join him in an attack on Chittaure. The king of Chittaure, seeing the king of Gujarat with Bhairavasena, made peace and gave a large amount as indemnity. Hearing of this attack, Humayun came with a large force Bhairavasena fought with him and defeated him Bahadur Shah embraced the victorious hero and gave him great honour and sent him to his capital, offering many presents such as horses, elephants, gold, clothes, royal umbrellas, chowries and his own bracelet.[3]

1 *cf* Shoojaat Khan, governor of Malwa, on going up to the fort one day, in front of the king, was attacked by one Othman, a person whom he had deprived of his right hand some time before, and who now, concealing himself by the road side, rushed out, and inflicted a dagger wound on Shoojaat Khan, who without further enquiry, conceiving the act had been preconcerted with the king, fled with precipitation towards Malwa with all his troops. The king pursued him as far as Mando, but hearing that he had fled to Banswalla, he returned, leaving Less Khan Soor, with twenty thousand horse, at Oojein, to watch his motions. These events occurred in the year 95[illegible]

Briggs' Ferishata Vol II p 12[illegible]

2 When the light of the sun of Bahadur Shah fell on the fort of M[illegible], Baharji Raja of Baglana was admitted to the honour of kissing [illegible] The Sultan showed him much kindness, and gave him two [illegible] earrings Baharji, by way of showing his loyalty gave one of his sisters in marriage to the Sultan, and the next day at the Sultan's desire, he [illegible] mother of his sisters to Muhammad Khan Asiri [illegible] thence When he passed the Baglana frontier, and [illegible] Sultan, he bestowed on Baharji the title of Rana Khan, and [illegible] the fort of Chaul with orders to [illegible] he pressed on by forced marches to Ahm[illegible]

M[illegible]

3 This is not borne out by [illegible] Vol II pp. 270 27[illegible]

राष्ट्रौढक्षितिपालभालतिलकश्रीराजनारायण-
स्फूर्जत्कीर्त्तिचरित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।
भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्येऽस्मिन्दशमः सुराज्यमुदितः सर्गोऽगमत्पूर्णताम् ॥ ३९ ॥

॥ इति श्रीमद्गिरिभूपालमौलिमुकुटमणि [illegible] चरणसरो-
रोजमधुकरगिरिविकमरि श्रीमहाराजनारायणशाहो [illegible] रुद्र-
कविविरचिते राष्ट्रौढवंशे महाकाव्ये राज्यमहोत्सवो नाम दशमः सर्गः ॥

एकादशः सर्गः ।

एतस्मिन्समयेऽथ दक्षिणमहीपालस्य सेनाधिपाः
श्रीनारायणशाहदोर्बलभरान्मत्ता इव ।
प्रोन्मत्ताद्भुतशौर्यगुणगर्भ [illegible]
मूढाः प्रापुरनन्तनामनगरं जेतुं समुत्सुकाः ॥ १ ॥
अथ विपक्षसपक्षमहीधराः [illegible] ।
समरकामनया मिलितास्तदा नगरं [illegible] ॥ २ ॥
जयरमावरणोत्सव [illegible] ।
सपदि भैरवभूपतिसूनुना परिगतोऽरि [illegible] ॥ ३ ॥
नयपुरोपगतारिपताकिनी [illegible] ।
अथ नियोजयति स्म [illegible] ॥ ४ ॥
मितुरङ्गगतो नृपतिः [illegible] ।
निरगमत् [illegible] ॥ ५ ॥
महीपतिः [illegible] ।
[illegible] ॥ ६ ॥
[illegible]
[illegible]
[illegible]
[illegible]

अस्माद्भिः कटकान्तेषु गतिनः शान्तदेशेषु न
प्राकारेषु चतुरंगेषु नगरद्वारेषु न ।
वीरानयन्त्रान्तनुःशस्त्रगणानाग नागगण-
क्षोणीशः किल दक्षिणक्षितिपतिर्गर्भश्रिणीमश्रिणोत् ॥ ८ ॥

मोरानदे हरिगिरौ च मगरदेशे
दुर्गाधिकारिनिवहाः समवाप्नुवीराः ।
नालीकतुरगनिर्मितप्रगुणप्रताप-
यन्त्रोद्भिरन्वभिमतः समराङ्गणानि ॥ ९ ॥

नानाविधाग्निनयन्त्रगणेषु वर्त्तीसंसर्गमात्रसमयज्वलदौषधेषु ।
कोलाहलः प्रलयकालभवत्करालश्रीकालभैरवविरावगुरुर्बभूव ॥१०॥

लोकानाकुलयन्भृशं कवलयन्दिक्कुम्भिनः कम्पयन्
भूगोलं चलयन् गिरीन्विदलयन्नम्भोधिमुद्वेलयन् ।
दिग्वृन्दं भ्रमयन्मनो विकलयन्ब्रह्माण्डमास्फोटयन्
तत्रातर्कितमेककालमभवद्यन्त्रालिकोलाहलः ॥ ११ ॥

दिग्व्यापी देवतानामनिमिषनयनश्रेणिषु स्वैरचारी
धूमस्तोमस्तदानीं समजनि रभसादम्बुदाडम्बराभः ।
जानीमः शाहनारायणविशिखमहावर्षणाम्यत्प्रतीप-
क्षोणीपालप्रतापप्रखरतरचिराशीर्णवैश्वानरस्य ॥ १२ ॥

ततः प्रतप्तायसगोलमण्डलः खमण्डलं व्याप्य दिशः प्रकाशयन् ।
विपक्षकक्षं प्रति भैरवात्मजप्रतापदावाग्निरिवाशु चानगात् ॥ १३ ॥

जाज्वल्यमानायसगोलकाली स्वैरं चचारारिवरूथिनीषु ।
भक्तिप्रसन्नीकृतचक्रपाणेर्नानाभवन्तीव सुदर्शनाली ॥ १४ ॥

केनाप्यायसगोलकेन कतिचिद्व्यापादिताः कुञ्जरा
धावन्तस्तुरगाश्च केनचिदहो दग्धाः कति स्यन्दनाः ।
अन्येनापि पदातयः कतिपये केनापि सेनाधिपाः
शत्रूणामिति तुर्यभागरहिता सेना तदानीमभूत् ॥ १५ ॥

अत्रान्तरे शिखिमहीधरतोऽवतीर्णो
नारायणक्षितिपतेः पृतनाधिनाथः ।
उच्चैर्नदन्किल पलायनलालसानां
पृष्ठे ललाग सहसा रिपुसैनिकानाम् ॥ १६ ॥

केऽपि श्वाससमाकुलाः परिपतद्दन्तं निपेतुः क्षितौ
केचिन्निस्सहजानुभागविकलाः कम्पाकुलाश्चस्खलुः ।
अन्ये केचन तत्र कातरधियः प्राणान्जहुस्तत्क्षणं
पुत्राक्षः परिपालयेति शरणं वीरा ययुश्चापरे ॥ १७ ॥

खड्गत्रुटद्गात्रविनिर्यदस्रप्रवाहविप्लावितदुर्गमार्गाः ।
शेषाः परेऽनन्तपुरे कृतानि प्रापुः कथञ्चित्पटमन्दिराणि ॥ १८ ॥

अथ ते रथकुञ्जरवंशभरैरपरैरपि भूमिरुहप्रकरैः ।
त्वरया परया कटकं परितो रिपुतो भयतो वलयं विदधुः ॥ १९ ॥

केचित्तत्र विपन्नबान्धवसुहृन्मित्रादिशोकाकुलाः
सन्तेपुर्वसनैर्वियन्धुरपरे घोरासिधाराव्रणान् ।
अन्ये कालमुखान्तरालपतिताः सा हेमकुम्भस्तनी
हा भूयः परिरप्स्यते प्रियतमा सोद्वेगमित्यालपन् ॥ २० ॥

महीपतिस्तेषु तथाविधेषु पराक्रमं नोत्सहते स कर्तुम् ।
कदापि सूनुः किमु सिंहिकायाः प्रक्षीणमिन्दुं ग्रसते मनस्वी ॥ २१ ॥

श्रीनारायणशाहपार्थिवगुरुः प्रत्यर्थिपृथ्वीभृतां
साटोपं परिणीय कीर्त्तितनयां कुन्दावदातां स्वयम् ।
अस्मिन्नेव महोत्सवे हरिहराहूतेः कुमारस्य च
प्रोल्लासेन विवाहमङ्गलमहाकार्यं व्यधादादरात् ॥ २२ ॥

तूर्णं प्रतीपनृपतेरथ कोऽपि वीरः
प्राप स्ववर्गविजयाय पुरीमरावीम् ।
नारायणक्षितिपतेः सुभटेन तस्यां
जित्वैनमस्य सकलापि चमूरलुण्ठि ॥ २३ ॥

अत्रान्तरे रिपुचमूः कमनीयदेवस्थानाभिधानपुरमाशु समाजगाम ।
सेयं मयूरगिरिनायकसैन्यमध्याद्वीरैर्ग्रहैरिव वपुर्नवभिर्निरस्ता ॥ २४ ॥

विनीय तत्रैव दिनैः कियद्भिः प्रहारमूर्च्छां स पुनर्वलीयः ।
भुक्त्वाऽवशिष्टप्रबलस्वकर्मप्रभावनुन्नो रणमाचकाङ्क्ष ॥ २५ ॥

वामे विधाय किल घाटशिलाख्यशैलं
नाराचलं हरिणमालमहीधरं च ।
पूर्वानुभूतविविधास्त्रनिपातभीत्या
वक्राध्वना सपदि जाम्बवटीं ययुस्ते ॥ २६ ॥

ततो मयूराचलतीर्थभूमौ शरीरपातं किमु कर्तुकामम् ।
प्रचण्डमाटीकत मोखघट्टे वटोपकण्ठे कटकं भटानाम् ॥ २७ ॥

आकर्ण्य तान्मोखवटे समेतान्नारायणक्षोणिपतिस्तदानीम् ।
विहारसौधान्निजवीरवर्गैराशोभिनां भद्रसभामयासीत् ॥ २८ ॥

तं सूर्यपादान्वितमेघडम्बरच्छत्राधिकच्छायमुखेन्दुमण्डलम् ।
परिस्फुरच्चामरयुग्मवीजितं सामन्तभूमीपतयो ववन्दिरे ॥ २९ ॥

विपक्षपक्षक्षयसाधनानि प्रदाय तेभ्यः क्षितिपालमौलिः ।
तुरङ्गमुत्तुङ्गतरं सिताङ्गं सान्नाह्यमारोहदुदारतेजाः ॥ ३० ॥

मयूरगिरिगह्वरप्रतिविरावनारीभव-
द्रणत्समरडिण्डिमध्वनिगभीरभेरीरवैः ।
जगाम सुरकामिनीकथितमण्डनाडम्बरः
स्फुरत्कटकसागरः समरजित्वरः सत्वरः ॥ ३१ ॥

अरिनीहारनाशाय नारायणनराधिपः ।
जैत्रापुरद्वारदेशप्राकारशिरसि स्थितः ॥ ३२ ॥

अधुनैव पराजितैरमीभिर्मदर्कैर्न स्वयमाहवः प्रशस्यः ।
इति चारु विचार्य राजसिंहः प्रतिवीरेषु युयोज पत्तिसैन्यम् ॥ ३३ ॥

उभयोरथ सेनयोस्तयोः समरोऽभूत्तुमुलः समेतयोः ।
दिवि देवचकोरचक्षुषामपि(वीरान्प्रति)विग्रहोऽभवत् ॥ ३४ ॥

तत्र सङ्गरकृतूहलहर्ष्ये भैरवक्षितिपनन्दनसैन्ये ।
लभ्यते स्म परमं जयलक्ष्मीपक्षपातकमनीयकटाक्षः ॥ ३५ ॥

श्रीनारायणशाहसैन्यजलदे चञ्चत्कृपाणीतडि-
द्दाम्नि छन्नरिपुप्रतापतपने बाणावलिं वर्षति ।

पूर्णा शोणितवाहिनी सुरवधूकन्दर्पदावानलः
शान्तोऽभूद्विरराम वैरिवनितासीमन्तमार्गोदयः ॥ ३६ ॥
चक्रुर्नृत्यकुतूहलानि परितो वल्गत्कबन्धालयो
वीरोत्तालकपालतालरणितं तेनुः पिशाचाङ्गनाः ।
श्रीनारायणभूमिपालतिलकप्रौढप्रतापं जगुः
सन्तृप्ताः पिशितेन राक्षसगणाः सङ्ग्रामरङ्गाङ्गणे ॥ ३७ ॥
तान्पलायनपरान्परानथ प्रेक्ष्य भैरवतनूजसैनिकैः ।
वस्त्रवारणतुरङ्गमायुधद्रव्यसम्पदखिलाऽपि लुण्ठिता ॥ ३८ ॥
निर्यच्छोणितपूरताम्रवपुषः खैरं रुदन्तो मुहु-
र्न्यञ्चन्मुद्गरघातभग्नदशना दिग्वाससो निस्त्रपाः ।
उद्गच्छज्जठरान्त्रनालसहितास्तेनूनमासन्पुन-
र्जन्मानो रणभूमिमातुरुदरात्तत्कालमेव च्युताः ॥ ३९ ॥
विहाय कीर्त्तिं घनसारगौरीमकीर्त्तिमादाय विधेयमूढाः ।
सर्वे प्रतीपक्षितिपालशूराः शरीरमात्रेण ययुः स्वदेशम् ॥ ४० ॥
अथ द्विषां केतुतुरङ्गनागान्वस्त्राणि शस्त्राणि च कोशजातम् ।
आनीय नारायणराजसिंहं प्रणेमुरुत्पुलकमुग्राः प्रवीराः ॥ ४१ ॥
विहाय लक्ष्मीपतिलक्ष्मकेतुं तथा नृपकाग्रयवारणेन्द्रान् ।
यल्लुण्ठितं येन तदेव तस्मै नृपः प्रमोदाददादुदारः ॥ ४२ ॥
विरलरत्नाभरणाम्बराणि सुवर्णटङ्कानथ भूषणानि ।
ग्रामाननेकानपि सैनिकेभ्यस्तदाऽददाद्भूमिपतिः कृतज्ञः ॥ ४३ ॥
उद्दामदुन्दुभिनिनादगभीरभेरीभाङ्काररावमुखरीकृतदिग्विभागः ।
सेनाचरैः सममगाद्गराजसारो भद्रासनं सपदि भैरवभूपसूनुः ॥ ४४ ॥
तत्र सद्मनि सुवर्णमयं मण्डपमन्दरसुमनीशालभञ्जि ।
किङ्करीकृतसमस्तभूपतिर्भूमिमैथिलनगरीमिदासुनन्द ॥ ४५ ॥
अथैतावसरे गुरुर्द्विजिपदां मन्ये द्विजेन्द्राणं
दारिद्र्यद्विसुतान्पदं दलयितुं सिंहं समभ्यागतः ।
श्रीनारायणभूपतेर्दिनाभिधामासपर्दं महात्मा
दानाम्बुस्त्रवपङ्कपेव हरितो भोजावलीनाभिन्नः ॥ ४६ ॥

श्रीमद्बागुलभूमिपालतिलकश्रीशाहनारायण-
स्फूर्जत्कीर्तिचरित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।
भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्येऽस्मिन्नगमन्कुनारिविजयः सर्गोऽयमेकादशः ॥ ४८ ॥

इति श्रीमद्[illegible]भूपालमौलिमुकुटललाममालामरीचिवीचिचुम्बितचरणसरोज-
[illegible]नारायणशा[illegible]जितदाक्षिणात्यरुद्रकवीन्द्र-
विरचिते राष्ट्रौढवंशे महाकाव्ये वैरिवीरपरिभवो नाम एका-
दशः सर्गः ॥

द्वादशः सर्गः ।

संग्राम[illegible]नजयवर्तिनाना-
[illegible]विपरिवारनिपेक्षमाणाम् ।
[illegible]मुनिवृन्दविराजितीर्ग
[illegible] स नृपो विदिशक्षुगमीन ॥ १ ॥

[illegible]
[illegible] विनिवास सपूर्वकेन्दे ।
[illegible]
[illegible] सपूर्णिश्रयगीः ॥ २ ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ॥ ३ ॥

[illegible]
[illegible] ।
[illegible]
[illegible] ४

सानन्दजानपदवृन्दमहोपहारै-
रुन्नम्रताम्रपटमण्डपमन्दिरैश्च ।
रम्याः पथि क्षितिपतेरभवन्निवासाः
श्रीमत्पुरोपवनराजिविहारसाराः ॥ ५ ॥

नीत्वैकरात्रमथ हस्तगिरौ पुरस्ता-
द्गच्छन्नसौ दुरितकुञ्जरसिंहनादम् ।
दिग्विश्रुतः श्रुतिपथातिथिमातिथेयो
गङ्गाप्रवाहरवमादरवानकार्षीत् ॥ ६ ॥

नेत्रारविन्दजनुषः फलमुत्पलाढ्यां
गोदावरीमुभयतीरचरीमपश्यत् ।
उत्तीर्य चापि शिबिकासनतस्तदानी-
मष्टोत्तरं शतमसावकरोत्प्रणामान् ॥ ७ ॥

बद्धाञ्जलिः पुलकमण्डितगात्रयष्टि-
र्नारायणक्षितिपतिस्तटिनीमनौषीत् ।
कल्याणि गौतमि विमुक्तिपदावरोह-
निश्रेणि ससमुखि देवि सदा नमस्ते ॥ ८ ॥

संसारहारि सुखकारि सुधानुसारि
श्रीमन्मुरारिपदवारि निवारितारि ।
गोदावरीविमलवारि विपन्निवारि
श्रेयस्तनोतु मदनारिशिरोविहारि ॥ ९ ॥

नानाविधप्रचुरयोनिनिविष्टजन्तू-
नालोक्य जन्ममरणादिकदुःखदग्धान् ।
संसारदुस्तरमहार्णवमुत्तरीतुं
विश्वेश्वरेण कृतिना भुवि भावितासि ॥ १० ॥

इत्यादिकोमलपदावलिभिः स्तुवानः
पद्भ्यां व्रजन्मणिसुवर्णमयार्घपाणिः ।
श्रीभैरवक्षितिपुरन्दरनन्दनोऽसौ
गोदावरीतटभुवं रभसादविन्दत् ॥ ११ ॥

गोदावरीपरिसरं नगनाभिरामं
स्फारीकृतेषु परितः पटमण्डपेषु ।
भूमीपतिः श्रुतिमतिः सविलासनगर-
सम्भारसम्भ्रममचीकरदादरेण ॥ १२ ॥
अत्रान्तरं परमसात्त्विकप्रतीप-
भूपाभिकाङ्क्षिपुरुषः परतः समेत्य ।
निःशेषदेशजनसङ्घमवेक्ष्य नृपः
प्रत्येककाञ्चनकरग्रहणोत्सुकोऽभूत् ॥ १३ ॥
तं दामनद्धनिखिलावयवं तुरुष्कं
प्राक्षेपयत्पयसि पार्श्वचरैरगाधे ।
नारायणः परमकारुणिकस्तदानी-
मग्राहयत्करममुष्य जलाकुलस्य ॥ १४ ॥
नारायणक्षितिपतेः सपदि प्रसादा-
दासाद्य मज्जनविधानविरोधमुक्तिम् ।
गोदावरीजलनिमज्जनतोऽपि सङ्घाः
संसारबन्धनविमुक्तिपटुत्वमापुः ॥ १५ ॥
आचार्यमार्यमथ मन्त्रविदः समग्रा-
नाहूय सर्वदिगुपागतभूमिदेवान् ।
राजा जितेन्द्रियचयः किल देशकालौ
स्मृत्वा यथाविधि निमज्जनमन्वतिष्ठत् ॥ १६ ॥
स्नानं विधाय परिधाय च धौतवस्त्रे
विद्वान्विधाय विधिवज्जपतर्पणादि ।
धन्यो वदान्यजनमौलिमणिर्हिरण्य-
श्राद्धं विधाय दशदानविधिं व्यधत्त ॥ १७ ॥
नारायणः कनकभूषितगोसहस्रं
मत्तेभवाजि(रथराजत)हेमभारान् ।
दासीः प्रभूतमहिषीरपि रत्नराजी
राजीवचारुनयनो व्यतरद्विजेभ्यः ॥ १८ ॥

विनिर्गतभरस्वरपरम्परात्पविभूती-
भूपो न के.कल्पमहाभाद्यो तदानीम् ।
किन्तु प्रभूतफलदाः स्वयमप्यपूर्वा-
स्तस्मादिति द्विजगणाय सहस्रपूर्वीः ॥ १९ ॥
नारायणक्षितिपतिं प्रवदन्ति मन्दाः
कल्पद्रुमेण सदृशं फलदो गुणैश ।
कल्पद्रुमः स खलु कल्पितमेव दत्ते
श्रीमानकल्पितमपि क्षितिनायकोऽसौ ॥ २० ॥
तस्मिन्धनं दिशति भूभुजि दानशूरे
कस्यापि कर्णपदवीं न जगाम कर्णः ।
पातालमूलमगमद्बलिभूमिपालः
सिन्धुं सुरारिरपि शान्तकमलां गृहीत्वा ॥ २१ ॥
एतेन सर्वधरणीसुरमण्डलेभ्यो
दानोद्भवेन विनिवारितमादरेण ।
दारिद्र्यमाकलयति स्म नितान्तभीतं
नारायणक्षितिपतेरपमण्डलानि ॥ २२ ॥
दाता समस्तविदुषां न यथेष्टदाता
दाता यथेष्टमिह नैव समस्तदाता ।
दाता यथेष्टमथ चापि समस्तदाता
नारायणो वसुमतीवलये स एकः ॥ २३ ॥
श्रीभैरवक्षितिपवंशसरिन्दनेन
दारिद्र्यवल्लितति एतां धरणीसुराणाम् ।
तत्कुम्भमण्डलविदारणतूर्णनिर्ग-
त्सत्कीर्तिमौक्तिकगणेन दिशो विरेजुः ॥ २४ ॥
गन्धाम्बुपोषणमपूर्णि मक्षिकाणां
धंशाधिकाश्रयति धामनि भिक्षुकाणाम् ।
नारायणक्षितिपदानसुवर्णटङ्कै-
स्तेषां गृहेषु विलुठन्ति सुवर्णकूटाः ॥ २५ ॥

Once a learned Brahmana, [illegible] hearing the liberality and the fame of Bhairavasena, came to Mayûragiri from Benares and told the king [illegible] forming a Soma sacrifice. Bhairavasena gave him plenty of [illegible] and jewels. All this was spent by the Brahmana in performing the Soma sacrifice. Seeing that the Brahmana [illegible] with him, the king granted him the village of [illegible]. Bhairavasena then marched with his army to the river G[illegible]. After bathing in the river and worshipping the god Tryambaka, he proceeded to Nipakhheta (Niphad), and defeating the general of the enemy, he looted his long-collected [illegible], horses and ten furious elephants. On the peak of Saptaśringa, he paid his respects to the eighteen-armed goddess. He then besieged Hastagiri (Hatgar) which, though held out by the warriors of Nizam Shah, was at last taken by Bhairavasena by breaking open the gates of the forts with the tusks of furious elephants and killing the chief warriors of the enemies. After stationing one of his chief warriors with an army on the fort, the victorious king attacked the fort of Gâlana (Gâlan). Here too the battle lasted for one year but eventually the fort surrendered to him. The fort of Alangala (Alangal), which contained much wealth, was then taken by him by killing its commandant. Bhairavasena had seven sons:—1 Jayadarpa, 2. Virasena, 3. Nemadeva, 4. Nârâyaṇa, 5. Mhyâmdeva, 6. Lakshadhira and 7. Ambadeva.

Virasena, the second son, succeeded him. During his reign Pathan Hapasi[1] with a powerful army came to the fort of Vyârâ (in the Navasari District). Frightened at this news, Virasena requested his brother Nârâyaṇa to march against him. Nârâyaṇa proceeded against the enemy and completely routed the forces of the enemy. Changis Khan, the Governor of Gujarat, then asked for the help of Virasena against Mira. Virasena and Nârâyaṇa both joined with an army and gave battle near Thalner but Mira could not be conquered on account of the help he received from Tapakhhana of Virâta. Changiskhan had to fly away at night, leaving all his bag and baggage on the field. Nârâyaṇa Shah also retreated

1 Probably Asaf Khan H[illegible] who murdered Changis Khan.

ऊरुभ्यां धनधान्यधारणमुखव्यापारभाजो विशः
शूद्राः सज्जनसेविनश्चरणतस्तं रामभद्रं भजे ॥ ३३ ॥
चित्ताचन्द्रश्चक्षुषश्चण्डरश्मिः श्रोत्राल्लोको वायुरग्निस्तु वक्रात् ।
नाभेरन्नं शीर्षतो द्यौर्दिशो भूः पद्भ्यां जाता यस्य तं नौमि रामम् ॥३४॥
सकलभुवनपालं ताटकाशान्तिकालं
कनकनिभदुकूलं सौवभक्तानुकूलम् ।
दशवदनकरालं योगिचेतोमरालं
हृतकलिमलजालं राममालम्बयामः ॥ ३५ ॥
श्रेयःकल्मषजन्ममन्मथविपत्सम्पत्समाकर्षण-
क्षोभोच्चाटनमोहमारणवशीकारप्रकारक्षमम् ।
यागत्यागसमाधिदीक्षणपुरश्चर्यादिचर्यां विना
याचे त्वां रसना सदा जपतु मे रामेति मन्त्रेश्वरम् ॥ ३६ ॥
सन्तुष्टस्य तवाक्षिकोणकलया रङ्कोऽपि शक्रायते
रुष्टस्याथ तथैव देव कलये शक्रोऽपि रङ्कायते ।
तेन त्वामिदमेव मैथिलसुताप्राणेश्वर प्रार्थये
यन्मां दीनदयानिधान करुणादृष्ट्या समालोकय ॥ ३७ ॥
निशाविक्लवा चक्रवाकीव सूर्यं चकोरीव चन्द्रं मयूरीव मेघम् ।
समुद्दिश्य भो जानकीनायक त्वां मनोवृत्तिरानन्दमाविन्दते मे ॥३८॥
स्वामी कोपसमाकुलोऽपि सुतरां दासाय सीतापते
कृत्वा बन्धनमेकमेव कियता कालेन तं मुञ्चति ।
स्वामिन्पुत्रकलत्रमित्रधरणीगेहादिचिन्ताशतै-
र्बध्वा मामधुनाऽपि मोचनविधौ वार्त्ताऽपि नाधीयते ॥ ३९ ॥
श्रीरामनामपठनाय महान्तराये
जिह्वे सदा मधुरवस्तु ददामि तुभ्यम् ।
युद्धे जयाय गुडमाषघृतादिपिण्डैः
किं सैन्धवं न कुशलाः परिपालयन्ति ॥ ४० ॥
रसना मम रामनामसङ्गादिह गङ्गावदुपैतु पावनत्वम् ।
अविवादमयः सुवर्णभावं न किमु स्पर्शसमागमादुपैति ॥ ४१ ॥

रुचिरं तव नाम निर्मलं जपतां राम किमत्र दुष्करम् ।
इति वेद्मि तथापि हन्त मे हृदयं धावति यत्र कुत्रचित् ॥ ४२ ॥
रघुनाथ विचित्रमत्र किं परिपूर्णा करुणाऽस्ति यन्मयि ।
अपराधपरम्परावृतं न हि माता समुपेक्षते सुतम् ॥ ४३ ॥
प्राचीनदोषोद्भवदुःखमन्तं भोगादुपैतीति यदुक्तमस्ति ।
तत्सावकाशं रघुवीर तत्र यत्र त्वदीयो न कृपाकटाक्षः ॥ ४४ ॥
नार्थजातमिदमादरणीयं चित्तमेतदमलीकरणीयम् ।
रामनाम शरणीकरणीयं लीलया भवजलं तरणीयम् ॥ ४५ ॥

नानाराक्षसपाटनैकचतुरं ब्रह्मादिभिर्वन्दितं
नीलाम्भोजदलद्युतिं च विमलं पीताम्बरं सुन्दरम् ।
विश्वाधीश्वरमेकमादिपुरुषं राजीवनेत्रं मुदा
श्रीरामं समुपास्महे रघुकुलालङ्कारचूडामणिम् ॥ ४६ ॥
राम चेन्मम ददासि न सङ्गं तं वियोगमपि राघव देहि ।
येन सा जनकराजकुमारी राम राम रमणेति बभाण ॥ ४७ ॥

तूष्णीं स्थितासि किमु जानकि हन्त मात-
र्जानासि किं न रघुवीरवियोगखेदम् ।
तत्त्वं कथं कथयसीति न राममेनं
दीनं समानय विभो निजपादपद्मम् ॥ ४८ ॥
सौमित्रे त्रिभुवनसार्वभौमकर्णे
विज्ञप्तिं कथय ममापराधिनोऽपि ।
बालत्वात्स्खलितभवद्वचोविनोदैः
सानन्दो रघुपतिराशु धास्यतीमाम् ॥ ४९ ॥

समीरसूनो वचनं मदीयं विज्ञाय विज्ञापय राघवाय ।
परोपकारैकफलाय नूनं सतां महाराजगृहे निवासः ॥ ५० ॥
सुग्रीवेण पुरा प्रसन्नमनसे रामाय संप्रार्थिना
किष्किन्धाऽथ विभीषणेन कृतिना लङ्का महीमण्डनम् ।
दातुं किञ्चन पृच्छतेऽपि भवता नाद्यापि नद्याचितं
तत्संप्रार्थय मारुते मयि कृपापाङ्गावलोकाङ्कुरम् ॥ ५१ ॥

स्तुतिं त्वदीयां कियतीं विधाय स्वामिन्मया हन्त विरम्यते यत् ।
अमादशक्तेरथवा तदेतन्नेयत्तया राघव ते गुणानाम् ॥ ५२ ॥
समर्प्य रम्यस्तवपूर्वमेवं पुष्पाञ्जलिं रामपदारविन्दे ।
पुनर्यमाम्बातनयो मनस्वी गोदावरीतीरनिवासमागात् ॥ ५३ ॥
हैयङ्गवीनप्लपितानि तीर्थश्राद्धाङ्गभूतानि रसोत्तराणि ।
अन्नानि लक्षावधि भूमिदेवानभोजयद्भूमिपतिस्तदानीम् ॥ ५४ ॥
गोदावरीरोधसि सप्तरात्रं विनीय संप्रस्थितसैन्यभारः ।
धरावलारातिरवाप्य देवस्थानाभिधग्राममतिष्ठदीपत् ॥ ५५ ॥
जामातरं मङ्गलजित्प्रवीरं दत्त्वा समं शार्ङ्गधरं द्विजं च ।
तत्रायमन्तःपुरपङ्कजाक्षीः प्रास्थापयत्कोकिगिरिं ससैन्याः ॥ ५६ ॥
द्विषां विनेता हरितां विजेता जवारिराज्यग्रहणोत्सुकोऽसौ ।
समस्तसेनासहितस्तदानीं महीपतिः पीठपुरं समेतः ॥ ५७ ॥
महापटागारमख(?था)स्य तस्य व्यधात्तडागस्य तटोपकण्ठे ।
उत्फुल्लपङ्केरुहलोचनैर्यो वीक्षांबभूवेव नरेन्द्रमेनम् ॥ ५८ ॥
मनोरमं केवलधर्ममूर्त्तिं राजानमाजानुभुजं निरीक्ष्य ।
यो विस्मयादम्बुजकोशदम्भान्नितान्तरोमाञ्चितमूर्त्तिरासीत् ॥ ५९ ॥
स यावदभ्येति महीमहेन्द्रः सेनाचरैस्तावदहो पुरोगैः ।
सर्वा जवारिक्षितिनायकस्य सौराज्यलक्ष्मीरचिरादलुण्ठि ॥ ६० ॥
मुखे तृणं कण्ठतटे कुठारं कृत्वा जवारिक्षितिपः सकम्पः ।
दयासमुद्रं शरणं शरण्यं नारायणं भूपतिमाजगाम ॥ ६१ ॥
चिरार्जितं रत्नसुवर्णराशिमुत्तुङ्गमातङ्गतुरङ्गसंघान् ।
राज्यादुपानीय जवारिराजो नरेन्द्रपादाम्बुजयोः पपात ॥ ६२ ॥
कियन्त्यपि ग्रामपुराणि तूर्णं प्रदाय नारायणपार्थिवाय ।
कृताञ्जलिः किङ्करतावलम्बी जवारिराज्यं स नृपो ययाचे ॥ ६३ ॥
एवं जवारिक्षितिपं क्षणेन ससेवकीकृत्य विशालकीर्त्तिः ।
रामाभिधानं नगरं नरेन्द्रः श्रीरामदेवस्य विजेतुमैच्छत् ॥ ६४ ॥
स रामनृपतिः समाजिगमिषाममुष्य प्रभो-
र्जवारिधरणीपतेरपि निशम्य वार्त्तामिमाम् ।

स्वराज्यहितहेतवे सपदि दण्डदानं शिवं
भवेदिति विचारयन्स्वयमियाय नारायणम् ॥ ६५ ॥

श्रीरामनामनृपतेर्गजवाजिराजी-
मादाय पेण्डवलनामगिरिं स देशम् ।
सानन्दमागमदुदारयशास्तदानीं
नारायणक्षितिपतिर्निजराजधानीम् ॥ ६६ ॥

अस्य क्षोणिपतेः प्रतापशिखिनो निश्शेषमेधायते
शत्रूणां पटलं तदीयमयशो जानामि धूमायते ।
मार्तण्डांशुलसत्कृपाणलतिका ज्वालाकलापायते
दारिद्र्यप्रसरः समस्तविदुषां सद्यः पतङ्गायते ॥ ६७ ॥

हस्ताग्रेण सुरद्रुमाग्रकुसुमस्तोमावचायेच्छया
दिक्सारङ्गविलोचनास्तनघनश्रीखण्डलेपायिताम् ।
सोल्लासं दिवि यस्य कीर्त्तिमतुलां गायन्ति देवाङ्गनाः
सोऽयं दातृशिरोमणिर्विजयते श्रीशाहनारायणः ॥ ६८ ॥

श्रीनारायणशाहकीर्त्तिमतुलां लोकत्रयव्यापिनीं
कैलासेन महीभृता तुलयितुं धाताऽभवत्सोद्यमः ।
तत्पूर्त्यै गिरिशं ततः शशिकलां पश्चात्तु मन्दाकिनी-
माधायाप्यतुलेति नाभिनलिनं विष्णोर्विवेश ह्रिया ॥ ६९ ॥

धातः किं ननु तुल्यते हिमवता सार्द्धं यशः कस्य वा
श्रीनारायणभूपतेर्वत भवान्व्यक्तोऽधुना वैदिकः ।
कस्माद्व्याप जगत्रयीमिदमसौ कुत्रेति न ज्ञायते
धाता वालसरस्वतीवचनतो भग्नोद्यमोऽभूदतः ॥ ७० ॥

मार्गं पृच्छन्ति पान्थानिति पुलिनपतत्कूजितैः सिन्धवोऽयं
श्रीमन्नारायणक्ष्मापतिरिह कुशली शास्ति विश्वम्भरां किम् ।
यस्योद्यत्खड्गधाराहतरिपुतरुणीनेत्रपानीयपूर-
स्फारीभूतप्रवाहाश्चिरमिह जलधेः सङ्गसौख्यं भजामः ॥ ७१ ॥

श्रीनारायणशाहसैन्यखुरक्षुण्णां क्षितिं मूर्छितां
संवीक्ष्य प्रतिनृपतिप्रियतमाः सिञ्चन्ति नेत्राम्बुभिः ।

लीलाकम्पितकर्णतालपवनैः संवीजयन्ति द्विपा
जानीमो दिवि धूलिधोरणिरियं छायार्थमुत्सर्पति ॥ ७२ ॥
वाटी विष्टपमण्डलीह विततो जागर्त्ति कीर्त्तिद्रुम-
स्तद्बीजं बलमालवालवलयं तस्यैष नारायणः ।
दानाम्भः स बिभर्त्ति तस्य जलधिः कूपः पयोदा घटी-
यन्त्रं तत्र चकास्ति तस्य घटनाकारी च वर्षाऋतुः ॥ ७३ ॥
नाकारं शेषनागात्क्षितिभरसहनाद्धीरवीरत्वयोगा-
द्राकारं रामचन्द्रादविनतदमनादेव याम्यं यकारम् ।
जाने कर्णाण्णकारं परमवितरणादेवमादाय वर्णा-
न्विष्णोरङ्गानुरूपां पटुरदित विधिस्तस्य नारायणाख्याम् ॥ ७४ ॥
नवोढवनिताकुचैरिव सुदुर्द्धरैस्तत्क्षणं
खिलीकृतमनोजवैः प्रणयिनीकटाक्षैरिव ।
तदीयतुरगैः क्षणादियमकारि वाराङ्गना-
धनागममनोरथैरिव वसुन्धरा गोष्पदम् ॥ ७५ ॥
सोऽयं कार्त्तिकपर्वरात्रिरमणस्फारयशोमण्डलः
स्पष्टज्येष्ठकठोरघर्मकिरणप्रौढप्रतापोदयः ।
श्रीमद्भैरवभूपुरन्दरकुलालङ्कारचूडामणिः
कल्याणं कुरुते स्म भूमिवलये भूदेवचिन्तामणिः ॥ ७६ ॥
श्रीमद्बागुलभूमिपालतिलकश्रीशाहनारायण-
स्फूर्जत्कीर्त्तिचरित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।
भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्ये(तीर्थनिषेवणादिविषयस्सर्गोऽगमद्द्वादशः) ॥ ७७ ॥

इति श्रीमदखिलभूपालमौलिमुकुटललाममालामरीचिवीचीचुम्बितचरणसरोज-
मयूरगिरिकेसरिश्रीमहाराजनारायणशाहयोजितदाक्षिणात्यरुद्रकवीन्द्र-
विरचिते राष्ट्रौढवंशे महाकाव्ये गोदावरीयात्राप्रसङ्गो नाम
द्वादशः सर्गः ॥

त्रयोदशः सर्गः ।

अथ प्रजापालनलब्धकीर्त्तिर्मल्लारचो मन्मथरम्यमूर्त्तिः ।
राज्ञां स्वधर्मोऽयमिति क्षितीशः स्वच्छन्दमैच्छन्मृगयाविलासम् ॥ १ ॥
सवागुराचित्रकसारमेयगणैर्नावल्लीजालधरैरनेकैः ।
वल्लैः परीतः परितः प्रतीतः पतिः प्रजानामगमद्यशस्वी ॥ २ ॥
स श्यामलाख्यानपुरोपकण्ठे दृश्याणि कृत्वा विततज्यधन्वा ।
शार्दूलसारङ्गमहावराहमृगादिकीर्णान्यविशद्वनानि ॥ ३ ॥
वल्लीषु संवेशितकोमलाङ्ग्यो मधुव्रतारोपितनेत्रशोभाः ।
मनोभिरामं तुरगाधिरूढं व्यलोकयन्काननदेवतास्तम् ॥ ४ ॥
उत्तस्थुषां पल्वलपङ्कमध्यात्पर्यस्तमुस्ताकवलं नरेन्द्रः ।
प्रकाशमार्गैः पदसन्निवेशैरबोधि मार्गं वनसूकराणाम् ॥ ५ ॥
आकर्णमाकृष्टसबाणधन्वा विचक्षणश्चञ्चललक्ष्यपाते ।
क्षणादविध्यन्नृपतिः प्रकोपात्सधुर्धुरं वन्यवराहयूथम् ॥ ६ ॥
एभिः स्वदंष्ट्रादलिताः कियन्तो दुरात्मभिः पान्थजना निगीर्णाः ।
इतीव कोपेन नृपेण नीताः कृतान्तदंष्ट्राकुहरं वराहाः ॥ ७ ॥
अमीमदन्तःपुरसुन्दरीणां विलोचनस्पर्द्धनवृद्धगर्वाः ।
इतीव कोपाकलितः कुरङ्गान्नृपः सपत्राकुरुते स्म सद्यः ॥ ८ ॥
जपादिकाले जगतीसुराणामतीव चर्मासनमर्हमस्य ।
शार्दूलयूथं हतवानतोऽसौ सतां तु हिंसा हि परोपकारे ॥ ९ ॥
अधिज्यधन्वा जगतो नियन्ता पापर्द्धिकौतूहलकैतवेन ।
अन्यानपि क्षोणिपतिः प्रचण्डानदण्डयत्काननदुष्टसत्त्वान् ॥ १० ॥
मयूरभूमीधरनामगन्धाघ्रायं निहन्ति स्म मयूरयूनः ।
कृपालयः प्रत्युत पालनाय स तानुदारानुररीकरोति ॥ ११ ॥
चमूरुशार्दूलमुखान्कुरङ्गाँल्लीलाविहङ्गान् शुकसारिकादीन् ।
महीपतिर्जीवत एव धृत्वा पटीनिवासानगमत्ससैन्यः ॥ १२ ॥
ततो हठादग्निमनन्दनेन श्रीतानदासेन गृहीतराज्यः ।
यस्मादभून्मङ्गलजित्कुमारः स गाङ्गदेवः क्षितिपं जगाद ॥ १३ ॥

उद्बुद्धसद्भाग्यभरप्रभावादुपागतस्त्वं मृगयामिषेण ।
श्रीराघवो गौतमदारदैवान्मखच्छलेनेव वनान्तभूमिम् ॥ १४ ॥
श्रीतानदासेन बलाद्गृहीतं श्रीवासुदेवाख्यपुरं विजित्य ।
तत्राभिषिञ्च क्षितिपालमौले जामातरं मुङ्गलजित्प्रवीरम् ॥१५॥
तद्गाङ्गदेवस्य वचो निशम्य प्रफुल्लरक्तोत्पललोचनश्रीः ।
नारायणक्षोणिपतिस्तदानीं सवाहिनीको विजयोत्सुकोऽगात् ॥ १६ ॥
घोरैः कुठारैः करिणां च दन्तैर्भग्नेषु नानाविधभूरुहेषु ।
असौ विहङ्गैरपि दुर्गमाणि व्यधात्प्रकाशानि महावनानि ॥ १७ ॥
तैरेवकाष्ठैरुपलैश्च लोष्टैरापूर्य पुर्याः परिखां गभीराम् ।
सा वासुदेवाभिधराजधानीमनीकिनी तस्य मुदा विवेश ॥ १८ ॥
पुरीमिमां पातितभूरिवीरैः पशूपहारैरिव पूजयित्वा ।
सा तानदासेन चिरप्रणीतां सौराज्यलक्ष्मीमखिलामलुण्ठत् ॥ १९ ॥
सम्बन्धिने दातुमिवाग्निसाक्षि नरेश्वरस्तां नगरीमधाक्षीत् ।
बभार या भर्गविलोचनाग्निजाज्वल्यमानत्रिपुरस्य शोभाम् ॥२०॥
विरोधिनः कीर्त्तिमिव क्षणात्तां भस्मावशेषां नगरीं विधाय ।
नृपो निवासाय नितान्तमाराचाम्पेयवाटीं नगरीं समेतः ॥ २१ ॥
अत्रान्तरे भैरवभूपसूनुप्रतापसन्तापितचित्तवृत्तिः ।
जीवं समादाय स तानदासो वनाद्वनान्तेषु पलायते स्म ॥ २२ ॥
श्रीगोमुखे तस्य विहारगेहं गत्वा मयूराचलमौलिसिंहः ।
नालीकशय्यासनडिण्डिमादिप्रभूतवस्तुप्रकरानदर्पीत् ॥ २३ ॥
श्रीवासुदेवाख्यपुरीं विशालां पुनर्नवीनां विरचय्य राजा ।
आनन्दिताऽशेषजनामकार्षीन्मनोरमां मुङ्गलजित्करस्थाम् ॥२४॥
तस्मिन्पुरे जाग्रति राजसिंहे वीरेश्वरे मुङ्गलजिन्मनस्वी ।
दिगन्तयातस्य निजाग्रजस्य स्थाने तदाऽभूद्धिटि सूरिवास्तैः ॥२५॥
श्रीगाङ्गदेवस्य पितुः समग्रस्त्वया निदेशः परिपालनीयः ।
नारायणक्षोणिपतेरितीमां गिरं स वीरः शिरसा बभार ॥ २६ ॥

श्रीवासुदेवाख्यपुराधिराज्ये नियुज्य जामानरमित्युदारम् ।
तत्रैव नीत्वा कतिचिद्दिनानि प्रस्थानुमैच्छच्छितिभूधरेन्द्रः ॥ २७ ॥

ततो मयूराचलराजधानीं संप्राप्य नारायणसार्वभौमः ।
चिरस्य सिंहासनसन्निविष्टो नितान्तमानन्दयति स्म लोकान् ॥ २८ ॥

ततः कदाचिद्बुरहानशाहक्षोणीभुजा दक्षिणदेशलब्ध्यै ।
सम्प्रार्थितो गालनपर्वतस्य वटाभिधग्राममगाददूरे ॥ २९ ॥

सम्प्रेष्य तूर्णं बुरहानशाहसाहाय्यहेतोर्निजमर्द्धसैन्यम् ।
ग्रामं तमेव स्वयमध्यतिष्ठत्स रुद्धभूरिप्रतिवीरसैन्यः ॥ ३० ॥

नारायणक्षोणिपतेरुदाराश्चमूचरास्तत्र निहत्य वीरान् ।
अथ क्षणाद्दक्षिणदेशराज्ये बुर्हाणशाहं नृपमभ्यषिञ्चत् ॥ ३१ ॥

तत्रास्य वीरैर्यदकारि सोऽयं नारायणक्षोणिपतेः प्रतापः ।
प्रातः समन्तादरुणस्तमिस्रं निहन्ति भानोर्महिमा स नूनम् ॥ ३२ ॥

अनेकमातङ्गतुरङ्गरत्नसुवर्णवस्त्रादिकवस्तुजातम् ।
नारायणक्ष्मापतयेऽनुरागात्संप्रेषयामास बुहाणशाहः ॥ ३३ ॥

बुर्हाणशाहक्षितिनायकेन दत्तानि सानन्दमुपायनानि ।
समीपमानीय चमूचरास्ते नारायणक्ष्मारमणं प्रणेमुः ॥ ३४ ॥

नारायणक्षोणिपतिस्तदानीं जगत्त्रयख्यातभुजप्रतापः ।
अपेतभीर्गालनशैलराजपर्यन्तनिश्शेषपुराण्यलुण्ठत् ॥ ३५ ॥

महीपतिः स्यन्दनहस्तिवामीमहोक्षदासेरकहारितार्थः ।
रिपोर्मयूराचलराजधानीमागत्य सिंहासनमध्यतिष्ठत् ॥ ३६ ॥

दिङ्नारीकर्णपूरीकृतविमलयशोमण्डलीपुण्डरीकः
संधीभूतांशमाला मनुजपतिरयं राजते नः पृथिव्याम् ।
एवं सम्भाव्य नारायणधरणिपतिप्राज्यसाम्राज्यभूमौ
कल्याणं सानुरागाः प्रतिदिनमधिकं तेनिरे लोकपालाः ॥ ३७ ॥

श्रीमद्बागुलभूमिपालतिलकश्रीशाहनारायण-
स्फूर्जत्कीर्त्तिचरित्रचित्रितपदे राष्ट्रौढवंशाभिधे ।

भव्ये दक्षिणदिग्भवेन कविना रुद्रेण सृष्टे महा-
काव्येऽस्मिन्मृगयाविहाररसिको रामेन्दुसर्गोऽगमत् ॥ ३८ ॥

॥ इति श्रीमदखिलभूपालमौलिमुकुटललाममालामरीचिवीचीचुम्बितचरणसरो-
जमयूरगिरिकेसरिश्रीमहाराजनारायणशाहोद्योजितदाक्षिणात्यरुद्रकवी-
न्द्रविरचिते राष्ट्रौढवंशे महाकाव्ये मृगयाविहारवासुदेवाख्य-
नगरविजयो नाम त्रयोदशः सर्गः ॥

चतुर्दशः सर्गः ।

नारायणक्षितिपतेः कुसुमावलीभि-
र्हर्षप्रकर्षमिव कर्तुमनास्तदानीम् ।
चूताङ्कुरे करतले कलयन्प्रसूनं
श्रीमान्वसन्तसमयः समुपाजगाम ॥ १ ॥

लवङ्गीमालिङ्गन्सरसमभिचुम्बन्नलिनीं
मतल्लीमातन्वन्नवहसितलीलाविलसिताम् ।
चिरं कुर्वंश्चञ्चत्पुलककु(क)लितां केतकलतां
भजन्वल्लीमल्लीं मलयपवनो मन्दमवहत् ॥ २ ॥

अथ मदनमहीपतिर्वसन्तं
सहचरमेनमवाप्य जातहर्षः ।
मुखरितपिकडिण्डिमः समन्ता-
त्सकलजगद्विजयाय संप्रतस्थे ॥ ३ ॥

कुसुमभरनमन्तः पल्लवैरुल्लसन्तः
कति कति न वसन्ते पादपाः सन्ति कान्ते ।
मधुरतरमरन्दे मञ्जुगुञ्जन्मिलिन्दे
तदपि गुणविशाले कापि शोभा रसाले ॥ ४ ॥

कति न सन्ति मधौ कुसुमद्रुमाः किसलयद्युतिनिर्जितविद्रुमाः ।
कलयते स्म रसाललता परं नियमिनोऽपि ननो वनितापरम् ॥ ५ ॥

जानीमहे नीरजलोचनानां मानं निहन्तुं मदनो जगाम ।
भृङ्गी यतो गायति वल्लिबाला प्रसूनजालान्परितः करोति ॥ ६ ॥
वनस्थलीं कैरवकोरकस्तनीं मधुव्रताक्षीं सरसीरुहाननाम् ।
परिस्फुरत्पल्लवपाणिशालिनीं प्रसूनहासां सुरभिर्व्यभूषयत् ॥ ७ ॥
कन्दर्पमार्तण्डमरीचिजालज्वालाकलापेन करालिताङ्गः ।
मनस्विनीमानसविद्यमानं मधुः पपौ मानपयः प्रतीमः ॥ ८ ॥
किंशुकाग्निशकलादधि धूमस्तोम एव किमु भृङ्गशरीरः ।
अन्यथा किमिति पान्थवधूनामश्रुपाटलविलोचनलक्ष्मीः ॥ ९ ॥
किंशुकीयकुसुमालिपावके माधवे खलु समागते सति ।
सोमयागमिव कर्तुमुद्यतः कोकिलः प्रतिदिनं मुदाऽपठत् ॥ १० ॥
मदनस्य यशो भृङ्गा जगदुः कलकूजितैः ।
मल्लीवल्ली वितनुते कलिकापुलकाङ्कुरान् ॥ ११ ॥
शमनवाहनकासरकातरत्वरितससिसमूह इवांशुमान् ।
अगमदुज्झितदक्षिणदिक्पथः समुचितामलकाधिपतेर्दिशम् ॥ १२ ॥
मेषमाप सहस्रांशुर्गान्धारस्वरभङ्गिभिः ।
पञ्चबाणयशोगानसकौतुकमना इव ॥ १३ ॥
विभिदे स्मरसिंहेन कान्ताकोपगजः किमु ।
पाटलाकलिकाः शङ्के तस्य शोणितविप्रुषः ॥ १४ ॥
वसन्तकालो मदनस्य गेहं दत्तः प्रदीपोऽत्र नवं पलाशम् ।
शिखाञ्जनं तस्य मधुव्रताली पतङ्गमाला जनधैर्यपाली ॥ १५ ॥
न जन्मकालो न च साधुसङ्गमः कुलं गुणानां परमं निदानम् ।
मल्लीसमीपे सुरभौ च जातं सौगन्ध्यमाधत्त न कर्णिकारम् ॥ १६ ॥
अत्रान्तरे रम्यवसन्तलक्ष्मीमहोत्सवालोकनकौतुकी सः ।
सानन्दमन्तःपुरसुन्दरीभिस्ताभिः समं निष्कुटमभ्युपेतः ॥ १७ ॥
मल्लीमतल्लीकुसुमालिशाली यासां विशालः कवरीकलापः ।
निगीर्णशीतांशुकलाकलापस्तमःपरीवार इव व्यराजत् ॥ १८ ॥
यासां प्रसूनाकुलकेशपाशे सिन्दूररेखा परभागमागात् ।
भागीरथीभानुसुताप्रवाहसङ्गे समायातसरस्वतीव ॥ १९ ॥